# Shri Shiva Mahapuranam 24 Rudra Samhita Kumarakhandah

# શ્રીશિવમહાપુરાણમ્ ૨૪ રુદ્રસંહિતાયાં કુમારખણ્ડઃ

## Document Information

Text title : Shivapuranam 2.4 rudrasaMhitA kumArakhaNDaH

File name : shivapurANam2rudrasaMhitA4kumArakhaNDaH.itx

Category : shiva, purANa, shivapurANa

Location : doc_purana

Proofread by : Revathy Rajaraman and team members

Latest update : January 23, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 25, 2026

*sanskritdocuments.org*

# શ્રીશિવમહાપુરાણમ્ ૨૪ રુદ્રસંહિતાયાં કુમારખણ્ડઃ

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૧. પ્રથમોઽધ્યાયઃ । તારકાર્દિતસુરાણાં શઙ્કરસન્નિધૌ દુઃખનિવેદનમ્ ।

વન્દે વન્દનતુષ્ટમાનસમતિપ્રેમપ્રિયં પ્રેમદં
પૂર્ણં પૂર્ણકરં પ્રપૂર્ણનિખિલૈશ્વર્યૈકવાસં શિવમ્ ।
સત્યં સત્યમયં ત્રિસત્યવિભવં સત્યપ્રિયં સત્યદં
વિષ્ણુબ્રહ્મનુતં સ્વકીયકૃપયોપાત્તાકૃતિં શઙ્કરમ્ ॥ ૧॥

નારદ ઉવાચ ।
વિવાહયિત્વા ગિરિજાં શઙ્કરો લોકશઙ્કરઃ ।
ગત્વા સ્વપર્વતં બ્રહ્મન્ કિમકાર્ષીદ્ધિ તદ્વદ ॥ ૨॥

કથં હિ તનયો જજ્ઞે શિવસ્ય પરમાત્મનઃ ।
યદર્થમાત્મારામોઽપિ સમુવાહ શિવાં પ્રભુઃ ॥ ૩॥

તારકસ્ય કથં બ્રહ્મન્ વધોઽભૂદ્દેવશઙ્કર ।
એતત્સર્વમશેષેણ વદ કૃત્વા દયાં મયિ ॥ ૪॥

સૂત ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય નારદસ્ય પ્રજાપતિઃ ।
સુપ્રસન્નમનાઃ સ્મૃત્વા શઙ્કરં પ્રત્યુવાચ હ ॥ ૫॥

બ્રહ્મોવાચ ।
ચરિતં શ‍ૃણુ વક્ષ્યામિ શશિમૌલેસ્તુ નારદ ।
ગુહજન્મકથાં દિવ્યાં તારકાસુરસદ્વધમ્ ॥ ૬॥

શ્રૂયતાં કથયામ્યદ્ય કથાં પાપપ્રણાશિનીમ્ ।
યાં શ્રુત્વા સર્વપાપેભ્યો મુચ્યતે માનવો ધ્રુવમ્ ॥ ૭॥

ઇદમાખ્યાનમનઘં રહસ્યં પરમાદ્ભુતમ્ ।
પાપસન્તાપહરણં સર્વવિઘ્નવિનાશનમ્ ॥ ૮॥

સર્વમઙ્ગલદં સારં સર્વશ્રુતિમનોહરમ્ ।
સુખદં મોક્ષબીજં ચ કર્મમૂલનિકૃન્તનમ્ ॥ ૯॥

કૈલાસમાગત્ય શિવાં વિવાહ્ય
શોભાં પ્રપેદે નિતરાં શિવોઽપિ ।
વિચારયામાસ ચ દેવકૃત્યં
પીડાં જનસ્યાપિ ચ દેવકૃત્યે ॥ ૧૦॥

શિવઃસ ભગવાન્ સાક્ષાત્કૈલાસમગમદ્યદા ।
સૌખ્યં ચ વિવિધં ચક્રુર્ગણાઃ સર્વે સુહર્ષિતાઃ ॥ ૧૧॥

મહોત્સવો મહાનાસીચ્છિવે કૈલાસમાગતે ।
દેવાઃ સ્વવિષયં પ્રાપ્તા હર્ષનિર્ભરમાનસાઃ ॥ ૧૨॥

અથ શમ્ભુર્મહાદેવો ગૃહીત્વા ગિરિજાં શિવામ્ ।
જગામ નિર્જનં સ્થાનં મહાદિવ્યં મનોહરમ્ ॥ ૧૩॥

શય્યાં રતિકરીં કૃત્વા પુષ્પચન્દનચર્ચિતામ્ ।
અદ્ભુતાં તત્ર પરમાં ભોગવસ્ત્વન્વિતાં શુભામ્ ॥ ૧૪॥

સ રેમે તત્ર ભગવાન્ શમ્ભુર્ગિરિજયા સહ ।
સહસ્રવર્ષપર્યન્તં દેવમાનેન માનદઃ ॥ ૧૫॥

દુર્ગાઙ્ગસ્પર્શમાત્રેણ લીલયા મૂર્ચ્છિતઃ શિવઃ ।
મૂર્ચ્છિતા સા શિવસ્પર્શાદ્બુબુધે ન દિવાનિશમ્ ॥ ૧૬॥

હરે ભોગપ્રવૃત્તે તુ લોકધર્મપ્રવર્તિનિ ।
મહાન્ કાલો વ્યતીયાય તયોઃ ક્ષણ ઇવાનઘ ॥ ૧૭॥

અથ સર્વે સુરાસ્તાત એકત્રીભૂય ચૈકદા ।
મન્ત્રયાઞ્ચક્રુરાગત્ય મેરૌ શક્રપુરોગમાઃ ॥ ૧૮॥

સુરા ઊચુઃ ।
વિવાહં કૃતવાઞ્છમ્ભુરસ્મત્કાર્યાર્થમીશ્વરઃ ।

યોગીશ્વરો નિર્વિકારો સ્વાત્મારામો નિરઞ્જનઃ ॥ ૧૯॥

નોત્પન્નસ્તનયસ્તસ્ય ન જાનીમોઽત્ર કારણમ્ ।
વિલમ્બઃ ક્રિયતે તેન કથં દેવેશ્વરેણ હ ॥ ૨૦॥

બ્રહ્મોવાચ ।
એતસ્મિન્નન્તરે દેવા નારદાદ્દેવદર્શનાત્ ।
બુબુધુસ્તન્મિતં ભોગં તયોશ્ચ રમમાણયોઃ ॥ ૨૧॥

ચિરં જ્ઞાત્વા તયોર્ભોગં ચિન્તામાપુઃ સુરાશ્ચ તે ।
બ્રહ્માણં માં પુરસ્કૃત્ય યયુર્નારાયણાન્તિકમ્ ॥ ૨૨॥

તં નત્વા કથિતં સર્વં મયા વૃત્તાન્તમીપ્સિતમ્ ।
સન્તસ્થિરે સર્વદેવાઃ ચિત્રે પુત્તલિકા યથા ॥ ૨૩॥

સહસ્રવર્ષપર્યન્તં દેવમાનેન શઙ્કરઃ ।
રતૌ રતશ્ચ નિશ્ચેષ્ટો યોગી વિરમતે ન હિ ॥ ૨૪॥

શ્રીભગવાનુવાચ ।
ચિન્તા નાસ્તિ જગદ્ધાતઃ સર્વં ભદ્રં ભવિષ્યતિ ।
શરણં વ્રજ દેવેશ શઙ્કરસ્ય મહાપ્રભોઃ ॥ ૨૫॥

મહેશશરણાપન્ના યે જના મનસા મુદા ।
તેષાં પ્રજેશ ભક્તાનાં ન કુતશ્ચિદ્ભયં ક્વચિત્ ॥ ૨૬॥

શૃઙ્ગારભઙ્ગઃ સમયે ભવિતા નાધુના વિધે ।
કાલપ્રયુક્તં કાર્યં ચ સિદ્ધિં પ્રાપ્નોતિ નાન્યથા ॥ ૨૭॥

શમ્ભોઃ સમ્ભોગમિષ્ટં કો ભદ્રાં કર્તુમિહેશ્વરઃ ।
પૂર્ણે વર્ષસહસ્રે ચ સ્વેચ્છયા હિ વિરંસ્યતિ ॥ ૨૮॥

સ્ત્રીપુંસો રતિવિચ્છેદમુપાયેન કરોતિ યઃ ।
તસ્ય સ્ત્રીપુત્રયોર્ભેદો ભવેજ્જન્મનિ જન્મનિ ॥ ૨૯॥

ભ્રષ્ટજ્ઞાનો નષ્ટકીર્ત્તિરલક્ષ્મીકો ભવેદિહ ।
પ્રયાત્યન્તે કાલસૂત્રં વર્ષલક્ષં સ પાતકી ॥ ૩૦॥

રમ્ભાયુક્તં શક્રમિમં ચકાર વિરતં રતૌ ।
મહામુનીન્દ્રો દુર્વાસાસ્તત્સ્ત્રીભેદો બભૂવ હ ॥ ૩૧॥

પુનરન્યાં સ સમ્પ્રાપ્ય વિષેવ્ય શુભપાણિકામ્ ।

દિવ્યં વર્ષસહસ્રં ચ વિજહૌ વિરહજ્વરમ્ ॥ ૩૨॥

ઘૃતાચ્યા સહ સંશ્લિષ્ટં કામં વારિતવાન્ ગુરુઃ ।
ષણ્માસાભ્યન્તરે ચન્દ્રસ્તસ્ય પત્નીં જહાર હ ॥ ૩૩॥

પુનશ્શિવં સમારાધ્ય કૃત્વા તારામયં રણમ્ ।
તારાં સગર્ભાં સમ્પ્રાપ્ય વિજહૌ વિરહજ્વરમ્ ॥ ૩૪॥

મોહિનીસહિતં ચન્દ્રં ચકાર વિરતં રતૌ ।
મહર્ષિર્ગૌતમસ્તસ્ય સ્ત્રીવિચ્છેદો બભૂવ હ ॥ ૩૫॥

હરિશ્ચન્દ્રો હાલિકં ચ વૃષલ્યા સહ સંયુતમ્ ।
વારયામાસ નિશ્ચેષ્ટં નિર્જને તત્ફલં શૃણુ ॥ ૩૬॥

ભ્રષ્ટઃ સ્ત્રીપુત્રરાજ્યેભ્યો વિશ્વામિત્રેણ તાડિતઃ ।
તતઃ શિવં સમારાધ્ય મુક્તો ભૂતો હિ કશ્મલાત્ ॥ ૩૭॥

અજામિલં દ્વિજશ્રેષ્ઠં વૃષલ્યા સહ સંયુતમ્ ।
ન ભિયા વારયામાસુઃ સુરાસ્તાં ચાપિ કેચન ॥ ૩૮॥

સર્વં નિષેકસાધ્યં ચ નિષેકો બલવાન્ વિધે ।
નિષેકફલદો વૈ સ નિષેકઃ કેન વાર્યતે ॥ ૩૯॥

દિવ્યં વર્ષસહસ્રં ચ શમ્ભોઃ સમ્ભોગકર્મ તત્ ।
પૂર્ણે વર્ષસહસ્રે ચ ગત્વા તત્ર સુરેશ્વરાઃ ॥ ૪૦॥

યેન વીર્યં પતેદ્ભૂમૌ તત્ કરિષ્યથ નિશ્ચિતમ્ ।
તત્ર વીર્યે ચ ભવિતા સ્કન્દનામા પ્રભોઃ સુતઃ ॥ ૪૧॥

અધુના સ્વગૃહં ગચ્છ વિધે સુરગણૈઃ સહ ।
કરોતુ શમ્ભુઃ સમ્ભોગં પાર્વત્યા સહ નિર્જને ॥ ૪૨॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા કમલાકાન્તઃ શીઘ્રં સ્વાન્તઃ પુરં યયૌ ।
સ્વાલયં પ્રયયુર્દેવા મયા સહ મુનીશ્વર ॥ ૪૩॥

શક્તિશક્તિમતોશ્ચાથ વિહારેણાતિ ચ ક્ષિતિઃ ।
ભારાક્રાન્તા ચકમ્પે સા સશેષાપિ સકચ્છપા ॥ ૪૪॥

કચ્છપસ્ય હિ ભારેણ સર્વાધારઃ સમીરણઃ ।
સ્તમ્ભિતોઽથ ત્રિલોકાશ્ચ બભૂવુર્ભયવિહ્વલાઃ ॥ ૪૫॥

અથ સર્વે મયા દેવા હરેશ્ચ શરણં યયુઃ ।
સર્વં નિવેદયાઞ્ચક્રુસ્તદ્વૃત્તં દીનમાનસા ॥ ૪૬॥

દેવા ઊચુઃ ।
દેવદેવ રમાનાથ સર્વાવનકર પ્રભો ।
રક્ષ નઃ શરણાપન્નાન્ ભયવ્યાકુલમાનસાન્ ॥ ૪૭॥

સ્તમ્ભિતસ્ત્રિજગત્પ્રાણો ન જાને કેન હેતુના ।
વ્યાકુલં મુનિભિર્લેખૈસ્ત્રૈલોક્યં સચરાચરમ્ ॥ ૪૮॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા સકલા દેવા મયા સહ મુનીશ્વર ।
દીનાસ્તસ્થુઃ પુરો વિષ્ણોર્મૌનીભૂતાઃ સુદુઃખિતાઃ ॥ ૪૯॥

તદાકર્ણ્ય સમાદાય સુરાન્નઃ સકલાન્ હરિઃ ।
જગામ પર્વતં શીઘ્રં કૈલાસં શિવવલ્લભમ્ ॥ ૫૦॥

તત્ર ગત્વા હરિર્દેવૈર્મયા ચ સુરવલ્લભઃ ।
યયૌ શિવવરસ્થાનં શઙ્કરં દ્રષ્ટુકામ્યયા ॥ ૫૧॥

તત્ર દૃષ્ટ્વા શિવં વિષ્ણુર્ન સુરૈર્વિસ્મિતોઽભવત્ ।
તત્ર સ્થિતાન્ શિવગણાન્ પપ્રચ્છ વિનયાન્વિતઃ ॥ ૫૨॥

વિષ્ણુરુવાચ ।
હે શઙ્કરાઃ શિવઃ કુત્ર ગતઃ સર્વપ્રભુર્ગણાઃ ।
નિવેદયત નઃ પ્રીત્યા દુઃખિતાન્વૈ કૃપાલવઃ ॥ ૫૩॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય સામરસ્ય હરેર્ગણાઃ ।
પ્રોચુઃ પ્રીત્યા ગણાસ્તે હિ શઙ્કરસ્ય રમાપતિમ્ ॥ ૫૪॥

શિવગણા ઊચુઃ ।
હરે શ‍ૃણુ શિવપ્રીત્યા યથાર્થં બ્રૂમહે વયમ્ ।
બ્રહ્મણા નિર્જરૈઃ સાર્દ્ધં વૃત્તાન્તમખિલં ચ યત્ ॥ ૫૫॥

સર્વેશ્વરો મહાદેવો જગામ ગિરિજાલયમ્ ।
સંસ્થાપ્ય નોઽત્ર સુપ્રીત્યા નાનાલીલાવિશારદઃ ॥ ૫૬॥

તદ્ગુહાભ્યન્તરે શમ્ભુઃ કિં કરોતિ મહેશ્વરઃ ।
ન જાનીમો રમાનાથ વ્યતીયુર્બહવઃ સમાઃ ॥ ૫૭॥

બ્રહ્મોવાચ ।
શ્રુત્વેતિ વચનં તેષાં સ વિષ્ણુઃ સામરો મયા ।
વિસ્મિતોઽતિ મુનિશ્રેષ્ઠ શિવદ્વારં જગામ હ ॥ ૫૮॥

તત્ર ગત્વા મયા દેવૈઃ સ હરિર્દેવવલ્લભઃ ।
આર્તવાણ્યા મુને પ્રોચે તારસ્વરતયા તદા ॥ ૫૯॥

શમ્ભુમસ્તૌન્મહાપ્રીત્યા સામરો હિ મયા હરિઃ ।
તત્ર સ્થિતો મુનિશ્રેષ્ઠ સર્વલોકપ્રભું હરમ્ ॥ ૬૦॥

વિષ્ણુરુવાચ ।
કિં કરોષિ મહાદેવાભ્યન્તરે પરમેશ્વર ।
તારકાર્તાન્સુરાન્સર્વાન્ પાહિ નઃ શરણાગતાન્ ॥ ૬૧॥

ઇત્યાદિ સંસ્તુવન્ શમ્ભું બહુધા સોઽમરૈર્મયા ।
રુરોદાતિ હરિસ્તત્ર તારકાર્તૈર્મુનીશ્વર ॥ ૬૨॥

દુઃખકોલાહલસ્તત્ર બભૂવ ત્રિદિવૌકસામ્ ।
મિશ્રિતશ્શિવ સંસ્તુત્યાસુરાર્ત્તાનાં મુનીશ્વર ॥ ૬૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે શિવવિહારવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૨.૪.૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૨. દ્વિતીયોઽધ્યાયઃ । શરવણે કાર્તિકેયોત્પત્તિવર્ણનમ્ ।

બ્રહ્મોવાચ ।
તદાકર્ણ્ય મહાદેવો યોગજ્ઞાનવિશારદઃ ।
ત્યક્તકામો ન તત્યાજ સમ્ભોગં પાર્વતીભયાત્ ॥ ૧॥

આજગામ ગૃહદ્વારિ સુરાણાં નિકટં શિવઃ ।

દૈત્યેન પીડિતાનાં ચ શઙ્કરો ભક્તવત્સલઃ ॥ ૨॥

દેવાઃસર્વે પ્રભું દૃષ્ટ્વા હરિણા ચ મયા શિવમ્ ।
બભૂબુઃ સુખિનશ્ચાતિ તદા વૈ ભક્તવત્સલમ્ ॥ ૩॥

ઇત્યાકર્ણ્ય વચસ્તેષાં સુરાણાં ભગવાન્ભવઃ ।
પ્રત્યુવાચ વિષણ્ણાત્મા દૂયમાનેન ચેતસા ॥ ૪॥

પ્રણમ્ય સુમહાપ્રીત્યા નતસ્કન્ધાશ્ચ નિર્જરાઃ ।
તુષ્ટુવુઃ શઙ્કરં સર્વે મયા ચ હરિણા મુને ॥ ૫॥

દેવા ઊચુઃ ।
દેવદેવ મહાદેવ કરુણાસાગર પ્રભો ।
અન્તર્યામી હિ સર્વેષાં સર્વં જાનાસિ શઙ્કર ॥ ૬॥

દેવકાર્યં કુરુ વિભો રક્ષ દેવાન્ મહેશ્વર ।
જહિ દૈત્યાન્ કૃપાં કૃત્વા તારકાદીન્ મહાપ્રભો ॥ ૭॥

શિવ ઉવાચ ।
હે વિષ્ણો હે વિધે દેવાઃ સર્વેષાં વો મનોગતિઃ ।
યદ્ભાવિ તદ્ભવત્યેવ કોઽપિ નો તન્નિવારકઃ ॥ ૮॥

યજ્જાતં તજ્જાતમેવ પ્રસ્તુતં શ ૃણુતામરાઃ ।
શિવરેતસ્ખલિતં વીર્યં કો ગ્રહીષ્યતિ મેઽધુના ॥ ૯॥

સ ગૃહ્ણીયાદિતિ પ્રોચ્ય પાતયામાસ તદ્ભુવિ ।
અગ્નિર્ભૂત્વા કપોતો હિ પ્રેરિતઃસર્વનિર્જરૈઃ ॥ ૧૦॥

અભક્ષચ્છામ્ભવં વીર્યં ચઞ્ચ્વા તુ નિખિલં તદા ।
એતસ્મિન્નન્તરે તત્રાજગામ ગિરિજા મુને ॥ ૧૧॥

શિવાગમવિલમ્બે ચ દદર્શ સુરપુઙ્ગવાન્ ॥

જ્ઞાત્વા તદ્વૃત્તમખિલં મહાક્રોધયુતા શિવા ॥ ૧૨॥

ઉવાચ ત્રિદશાન્ સર્વાન્ હરિપ્રભૃતિકાઁસ્તદા ॥ ૧૩॥

દેવ્યુવાચ ।
રે રે સુરગણાઃસર્વે યૂયં દુષ્ટા વિશેષતઃ ।
સ્વાર્થસંસાધકા નિત્યં તદર્થં પરદુઃખદાઃ ॥ ૧૪॥

સ્વાર્થહેતોર્મહેશાનમારાધ્ય પરમં પ્રભુમ્ ।
નષ્ટે ચક્રુર્મદ્વિહારં વન્ધ્યાઽભવમહં સુરાઃ ॥ ૧૫॥

માં વિરોધ્ય સુખં નૈવ કેષાઞ્ચિદપિ નિર્જરાઃ ।
તસ્માદ્દુઃખં ભવેદ્વો હિ દુષ્ટાનાં ત્રિદિવૌકસામ્ ॥ ૧૬॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા વિષ્ણુપ્રમુખાન્ સુરાન્ સર્વાન્ શશાપ સા ।
પ્રજ્વલન્તી પ્રકોપેન શૈલરાજસુતા શિવા ॥ ૧૭॥

પાર્વત્યુવાચ ।
અદ્યપ્રભૃતિ દેવાનાં વન્ધ્યા ભાર્યા ભવન્ત્વિતિ ।
દેવાશ્ચ દુઃખિતાઃસન્તુ નિખિલા મદ્વિરોધિનઃ ॥ ૧૮॥

બ્રહ્મોવાચ ।
ઇતિ શપ્ત્વાખિલાન્દેવાન્ વિષ્ણ્વાદ્યાન્સકલેશ્વરી ।
ઉવાચ પાવકં ક્રુદ્ધા ભક્ષકં શિવરેતસઃ ॥ ૧૯॥

પાર્વત્યુવાચ ।
સર્વભક્ષી ભવ શુચે પીડિતાત્મેતિ નિત્યશઃ ।
શિવતત્ત્વં ન જાનાસિ મૂર્ખોઽસિ સુરકાર્યકૃત્ ॥ ૨૦॥

રે રે શઠ મહાદુષ્ટ દુષ્ટાનાં દુષ્ટબોધવાન્ ।
અભક્ષઃ શિવવીર્યં યન્નાકાર્ષીરુચિતં હિતમ્ ॥ ૨૧॥

બ્રહ્મોવાચ ।
ઇતિ શપ્ત્વા શિવા વહ્નિં સહેશેન નગાત્મજા ।
જગામ સ્વાલયં શીઘ્રમસન્તુષ્ટા તતો મુને ॥ ૨૨॥

ગત્વા શિવા શિવં સમ્યક્ બોધયામાસ યત્નતઃ ।
અજીજનત્પરં પુત્રં ગણેશાખ્યં મુનીશ્વર ॥ ૨૩॥

તદ્વૃત્તાન્તમશેષં ચ વર્ણયિષ્યે મુનેઽગ્રતઃ ।
ઇદાનીં શ‍ૃણુ સુપ્રીત્યા ગુહોત્પત્તિં વદામ્યહમ્ ॥ ૨૪॥

પાવકાર્પિતમન્નાદિ ભુઞ્જતે નિર્જરાઃ ખલુ ।
વેદવાણ્યેતિ સર્વે તે સગર્ભા અભવન્સુરાઃ ॥ ૨૫॥

તતોઽસહન્તસ્તદ્વીર્યં પીડિતા હ્યભવન્ સુરાઃ ।

વિષ્ણ્વાદ્યા નિખિલાશ્ચાતિ શિવાજ્ઞાનષ્ટબુદ્ધયઃ ॥ ૨૬॥

અથ વિષ્ણુપ્રભૃતિકાઃસર્વે દેવા વિમોહિતાઃ ।
દહ્યમાના યયુઃ શીઘ્રં શરણં પાર્વતીપતેઃ ॥ ૨૭॥

શિવાલયસ્ય તે દ્વારિ ગત્વા સર્વે વિનમ્રકાઃ ।
તુષ્ટુવુઃસશિવં શમ્ભું પ્રીત્યા સાઞ્જલયઃસુરાઃ ॥ ૨૮॥

દેવા ઊચુઃ ।
દેવદેવ મહાદેવ ગિરિજેશ મહાપ્રભો ।
કિં જાતમધુના નાથ તવ માયા દુરત્યયા ॥ ૨૯॥

સગર્ભાશ્ચ વયં જાતા દહ્યમાનાશ્ચ રેતસા ।
તવ શમ્ભો કુરુ કૃપાં નિવારય દશામિમામ્ ॥ ૩૦॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્યાઽમરનુતિં પરમેશઃ શિવાપતિઃ ।
આજગામ દ્રુતં દ્વારિ યત્ર દેવાઃ સ્થિતા મુને ॥ ૩૧॥

આગતં શઙ્કરં દ્વારિ સર્વે દેવાશ્ચ સાચ્યુતાઃ ।
પ્રણમ્ય તુષ્ટુવુઃ પ્રીત્યા નર્તકા ભક્તવત્સલમ્ ॥ ૩૨॥

દેવા ઊચુઃ ।
શમ્ભો શિવ મહેશાન ત્વાં નતાઃ સ્મ વિશેષતઃ ।
રક્ષ નઃ શરણાપન્નાન્ દહ્યમાનાંશ્ચ રેતસા ॥ ૩૩॥

ઇદં દુઃખં હર હર ભવામો હિ મૃતા ધ્રુવમ્ ।
ત્વાં વિના કઃ સમર્થોઽદ્ય દેવદુઃખનિવારણે ॥ ૩૪॥

બ્રહ્મોવાચ ।
ઇતિ દીનતરં વાક્યમાકર્ણ્ય સુરરાટ્ પ્રભુઃ ।
પ્રત્યુવાચ વિહસ્યાથ સ સુરાન્ ભક્તવત્સલઃ ॥ ૩૫॥

શિવ ઉવાચ ।
હે હરે હે વિધે દેવાઃ સર્વે શૃણુત મદ્વચઃ ।
ભવિષ્યતિ સુખં વોઽદ્ય સાવધાના ભવન્તુ હિ ॥ ૩૬॥

એતદ્વમત મદ્વીર્યં દ્રુતમેવાખિલાઃસુરાઃ ।
સુખિનસ્તદ્વિશેષેણ શાસનાન્મમ સુપ્રભોઃ ॥ ૩૭॥

બ્રહ્મોવાચ ।
ઇત્યાજ્ઞાં શિરસાઽધાય વિષ્ણ્વાદ્યાઃ સકલાઃ સુરાઃ ।
અકાર્ષુર્વમનં શીઘ્રં સ્મરન્તઃ શિવમવ્યયમ્ ॥ ૩૮॥

તચ્છમ્ભુરેતઃસ્વર્ણાભં પર્વતાકારમદ્ભુતમ્ ।
અભવત્પતિતં ભૂમૌ સ્પૃશદ્ ઘ્યામેવ સુપ્રભમ્ ॥ ૩૯॥

અભવન્સુખિનઃસર્વે સુરાઃ સર્વેઽચ્યુતાદયઃ ।
અસ્તુવન્ પરમેશાનં શઙ્કરં ભક્તવત્સલમ્ ॥ ૪૦॥

પાવકસ્ત્વભવન્નૈવ સુખી તત્ર મુનીશ્વર ।
તસ્યાજ્ઞાં પરમોઽદાદ્વૈ શઙ્કરઃ પરમેશ્વરઃ ॥ ૪૧॥

તતઃ સવહ્નિર્વિકલઃ સાઞ્જલિર્નતકો મુને ।
અસ્તૌચ્છિવં સુખી નાત્મા વચનં ચેદમબ્રવીત્ ॥ ૪૨॥

અગ્નિરુવાચ ।
દેવદેવ મહેશાન મૂઢોઽહં તવ સેવકઃ ।
ક્ષમસ્વ મેઽપરાધં હિ મમ દાહં નિવારય ॥ ૪૩॥

ત્વં દીનવત્સલઃ સ્વામિન્ શઙ્કરઃ પરમેશ્વરઃ ।
પ્રત્યુવાચ પ્રસન્નાત્મા પાવકો દીનવત્સલમ્ ॥ ૪૪॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય શુચેર્વાણીં સ શમ્ભુઃ પરમેશ્વરઃ ।
પ્રત્યુવાચ પ્રસન્નાત્મા પાવકં દીનવત્સલઃ ॥ ૪૫॥

શિવ ઉવાચ ।
કૃતં ત્વનુચિતં કર્મ મદ્રેતો ભક્ષિતં હિ યત્ ।
અતો નિવૃત્તસ્તે દાહઃ પાપાધિક્યાન્મદાજ્ઞયા ॥ ૪૬॥

ઇદાનીં ત્વં સુખી નામ શુચે મચ્છરણાગતઃ ।
અતઃ પ્રસન્નો જાતોઽહં સર્વં દુઃખં વિનશ્યતિ ॥ ૪૭॥

કસ્યાશ્ચિત્સુસ્ત્રિયાં યોનૌ મદ્રેતસ્ત્યજ યત્નતઃ ।
ભવિષ્યતિ સુખી ત્વં હિ નિર્દાહાત્મા વિશેષતઃ ॥ ૪૮॥

બ્રહ્મોવાચ ।
શમ્ભુવાક્યં નિશમ્યેતિ પ્રત્યુવાચ શનૈઃ શુચિઃ ।

સાઞ્જલિર્નતકઃ પ્રીત્યા શઙ્કરં ભક્તશઙ્કરમ્ ॥ ૪૯॥

દુરાસદમિદં તેજસ્તવ નાથ મહેશ્વર ।
કાચિન્નાસ્તિ વિના શક્ત્યા ધર્તું યોનૌ જગત્ત્રયે ॥ ૫૦॥

ઇત્થં યદાઽબ્રવીદ્વહ્નિસ્તદા ત્વં મુનિસત્તમ ।
શઙ્કરપ્રેરિતઃ પ્રાત્થ હૃદાગ્નિમુપકારકઃ ॥ ૫૧॥

નારદ ઉવાચ ।
શ ृણુ મદ્વચનં વહ્ને તવ દાહહરં શુભમ્ ।
પરમાનન્દદં રમ્યં સર્વકષ્ટનિવારકમ્ ॥ ૫૨॥

કૃત્વોપાયમિમં વહ્ને સુખી ભવ વિદાહકઃ ।
શિવેચ્છયા મયા સમ્યગુક્તં તાતેદમાદરાત્ ॥ ૫૩॥

તપોમાસસ્નાનકર્ત્ર્યઃ સ્ત્રિયો યાઃસ્યુઃ પ્રગે શુચે ।
તદ્દેહેષુ સ્થાપય ત્વં શિવરેતસ્ત્વિદં મહત્ ॥ ૫૪॥

બ્રહ્મોવાચ ।
તસ્મિન્નવસરે તત્રાગતાઃ સપ્તમુનિસ્ત્રિયઃ ।
તપોમાસિ સ્નાનકામાઃ પ્રાતઃ સન્નિયમા મુને ॥ ૫૫॥

સ્નાનં કૃત્વા સ્ત્રિયસ્તા હિ મહાશીતાર્દિતાશ્ચ ષટ્ ।
ગન્તુકામા મુને યાતા વહ્નિજ્વાલાસમીપતઃ ॥ ૫૬॥

વિમોહિતાશ્ચ તા દૃષ્ટ્વારુન્ધતી ગિરિશાજ્ઞયા ।
નિષિષેધ વિશેષેણ સુચરિત્રા સુબોધિની ॥ ૫૭॥

તાઃ ષડ્ મુનિસ્ત્રિયો મોહાદ્ધઠાત્તત્ર ગતા મુને ।
સ્વશીતવિનિવૃત્ત્યર્થં મોહિતાઃ શિવમાયયા ॥ ૫૮॥

તદ્રેતઃકણિકાઃ સદ્યસ્તદ્દેહાન્ વિવિશુર્મુને ।
રોમદ્વારાઽખિલા વહ્નિરભૂદ્દાહવિવર્જિતઃ ॥ ૫૯॥

અન્તર્ધાય દ્રુતં વહ્નિર્જ્વાલારૂપો જગામ હ ।
સુખી સ્વલોકં મનસા સ્મરંસ્ત્વાં શઙ્કરં ચ તમ્ ॥ ૬૦॥

સગર્ભાસ્તાઃ સ્ત્રિયઃ સાધોઽભવન્ દાહપ્રપીડિતાઃ ।
જગ્મુઃસ્વભવનં તાતારુન્ધતી દુઃખિતાગ્નિના ॥ ૬૧॥

દૃષ્ટ્વા સ્વસ્ત્રીગતિં તાત નાથાઃ ક્રોધાકુલા દ્રુતમ્ ।

તત્યજુસ્તાઃ સ્ત્રિયસ્તાત સુસમ્મન્ત્ર્ય પરસ્પરમ્ ॥ ૬૨॥

અથ તાઃ ષટ્ સ્ત્રિયઃસર્વા દૃષ્ટ્વા સ્વવ્યભિચારકમ્ ।
મહાદુઃખાન્વિતાસ્તાતાભવન્નાકુલમાનસાઃ ॥ ૬૩॥

તત્યજુશ્શિવરેતસ્તદ્ગર્ભરૂપં મુનિસ્ત્રિયઃ ।
તા હિમાચલપૃષ્ઠેઽથાભવન્ દાહવિવર્જિતાઃ ॥ ૬૪॥

અસહન્ શિવરેતસ્તદ્ધિમાદ્રિઃ કમ્પમુદ્વહન્ ।
ગઙ્ગાયાં પ્રાક્ષિપત્તૂર્ણમસહ્યં દાહપીડિતઃ ॥ ૬૫॥

ગઙ્ગયાઽપિ ચ તદ્વીર્યં દુસ્સહં પરમાત્મનઃ ।
નિઃક્ષિપ્તં હિ શરસ્તમ્બે તરઙ્ગૈઃ સ્વૈર્મુનીશ્વર ॥ ૬૬॥

પતિતં તત્ર તદ્રેતો દ્રુતં બાલો બભૂવ હ ।
સુન્દરઃ સુભગઃ શ્રીમાંસ્તેજસ્વી પ્રીતિવર્દ્ધનઃ ॥ ૬૭॥

માર્ગમાસે સિતે પક્ષે તિથૌ ષષ્ઠ્યાં મુનીશ્વર ।
પ્રાદુર્ભાવોઽભવત્તસ્ય શિવપુત્રસ્ય ભૂતલે ॥ ૬૮॥

તસ્મિન્નવસરે બ્રહ્મન્નકસ્માદ્ધિમશૈલજા ।
અભૂતાં સુખિનૌ તત્ર સ્વગિરૌ ગિરિશોઽપિ ચ ॥ ૬૯॥

શિવાકુચાભ્યાં સુસ્રાવ પય આનન્દસમ્ભવમ્ ।
તત્ર ગત્વા ચ સર્વેષાં સુખમાસીન્મુનેઽધિકમ્ ॥ ૭૦॥

મઙ્ગલં ચાઽભવત્તાત ત્રિલોક્યાં સુખદં સતામ્ ।
ખલાનામભવદ્વિઘ્નો દૈત્યાનાં ચ વિશેષતઃ ॥ ૭૧॥

અકસ્માદભવદ્ વ્યોમ્નિ પરમો દુન્દુભિધ્વનિઃ ।
પુષ્પવૃષ્ટિઃ પપાતાઽશુ બાલકોપરિ નારદ ॥ ૭૨॥

વિષ્ણ્વાદીનાં સમસ્તાનાં દેવાનાં મુનિસત્તમ ।
અભૂદકસ્માત્પરમ આનન્દઃ પરમોત્સવઃ ॥ ૭૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે શિવપુત્રજનનવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૨.૪.૨॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૩. તૃતીયોઽધ્યાયઃ । કાર્તિકેયલીલાવર્ણનમ્ ।

નારદ ઉવાચ ।
દેવદેવ પ્રજાનાથ બ્રહ્મન્ સૃષ્ટિકર પ્રભો ।
તતઃ કિમભવત્તત્ર તદ્વદાઽદ્ય કૃપાં કુરુ ॥ ૧॥

બ્રહ્મોવાચ ।
તસ્મિન્નવસરે તાત વિશ્વામિત્રઃ પ્રતાપવાન્ ।
પ્રેરિતો વિધિના તત્રાગચ્છત્પ્રીતો યદૃચ્છયા ॥ ૨॥

સ દૃષ્ટ્વાલૌકિકં ધામ તત્સુતસ્ય સુતેજસઃ ।
અભવત્પૂર્ણકામસ્તુ સુપ્રસન્નો નનામ ચ ॥ ૩॥

અકરોત્સુનુતિં તસ્ય સુપ્રસન્નેન ચેતસા ।
વિધિપ્રેરિતવાગ્ભિશ્ચ વિશ્વામિત્રઃ પ્રભાવવિત્ ॥ ૪॥

તતઃસોઽભૂત્સુતસ્તત્ર સુપ્રસન્નો મહોતિકૃત્ ।
સુપ્રહસ્યાદ્ભુતમહો વિશ્વામિત્રમુવાચ ચ ॥ ૫॥

શિવસુત ઉવાચ ।
શિવેચ્છયા મહાજ્ઞાનિન્નકસ્માત્ત્વમિહાગતઃ ।
સંસ્કારં કુરુ મે તાત યથાવદ્વેદસમ્મિતમ્ ॥ ૬॥

અદ્યારભ્ય પુરોધાસ્ત્વં ભવ મે પ્રીતિમાવહન્ ।
ભવિષ્યસિ સદા પૂજ્યઃ સર્વેષાં નાત્ર સંશયઃ ॥ ૭॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય સુપ્રસન્નો હિ ગાધિજઃ ।
તમુવાચાનુદાત્તેન સ્વરેણ ચ સુવિસ્મિતઃ ॥ ૮॥

વિશ્વામિત્ર ઉવાચ ।
શ ૃણુ તાત ન વિપ્રોઽહં ગાધિક્ષત્રિયબાલકઃ ।
વિશ્વામિત્રેતિ વિખ્યાતઃ ક્ષત્રિયો વિપ્રસેવકઃ ॥ ૯॥

ઇતિ સ્વચરિતં ખ્યાતં મયા તે વરબાલક ।
કસ્ત્વં સ્વચરિતં બ્રૂહિ વિસ્મિતાયાખિલં હિ મે ॥ ૧૦॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય તત્સ્વવૃત્તં જગાદ હ ।
તતશ્ચોવાચ સુપ્રીત્યા ગાધિજં તં મહોતિકૃત્ ॥ ૧૧॥

શિવસુત ઉવાચ ।
વિશ્વામિત્ર વરાન્મે ત્વં બ્રહ્મર્ષિર્નાત્ર સંશયઃ ।
વસિષ્ઠાદ્યાશ્ચ નિત્યં ત્વાં પ્રશંસિષ્યન્તિ ચાદરાત્ ॥ ૧૨॥

અતસ્ત્વમાજ્ઞયા મે હિ સંસ્કારં કર્તુમર્હસિ ।
ઇદં સર્વં સુગોપ્યં તે કથનીયં ન કુત્રચિત્ ॥ ૧૩॥

બ્રહ્મોવાચ ।
તતોઽકાર્ષીત્સ સંસ્કારં તસ્ય પ્રીત્યાઽખિલં યથા ।
શિવબાલસ્ય દેવર્ષે વેદોક્તવિધિના પરમ્ ॥ ૧૪॥

શિવબાલોપિ સુપ્રીતો દિવ્યજ્ઞાનમદાત્પરમ્ ।
વિશ્વામિત્રાય મુનયે મહોતિકારકઃ પ્રભુઃ ॥ ૧૫॥

પુરોહિતં ચકારાસૌ વિશ્વામિત્રં શુચેસ્સુતઃ ।
તદારભ્ય દ્વિજવરો નાનાલીલાવિશારદઃ ॥ ૧૬॥

ઇત્થં લીલા કૃતા તેન કથિતા સા મયા મુને ।
તલ્લીલામપરાં તાત શ‍ૃણુ પ્રીત્યા વદામ્યહમ્ ॥ ૧૭॥

તસ્મિન્નવસરે તાત શ્વેતનામા ચ સમ્પ્રતિ ।
તત્રાઽપશ્યત્સુતં દિવ્યં નિજં પરમપાવનમ્ ॥ ૧૮॥

તતસ્તં પાવકો ગત્વા દૃષ્ટ્વાલિઙ્ગ્ય ચુચુમ્બ ચ ।
પુત્રેતિ ચોક્ત્વા તસ્મૈ સ શસ્ત્રં શક્તિં દદૌ ચ સઃ ॥ ૧૯॥

ગુહસ્તાં શક્તિમાદાય તચ્છૃઙ્ગં ચારુરોહ હ ।
તં જઘાન તયા શક્ત્યા શ‍ૃઙ્ગો ભુવિ પપાત સઃ ॥ ૨૦॥

દશપદ્મમિતા વીરા રાક્ષસાઃ પૂર્વમાગતાઃ ।
તદ્વધાર્થં દ્રુતં નષ્ટા બભૂવુસ્તત્પ્રહારતઃ ॥ ૨૧॥

હાહાકારો મહાનાસીચ્ચકમ્પે સાચલા મહી ।
ત્રૈલોક્યં ચ સુરેશાનઃસદેવસ્તત્ર ચાગમત્ ॥ ૨૨॥

દક્ષિણે તસ્ય પાર્શ્વે ચ વજ્રેણ સ જઘાન ચ ।

શાખનામા તતો જાતઃ પુમાંશ્ચૈકો મહાબલઃ ॥ ૨૩॥

પુનશ્શક્રો જઘાનાશુ વામપાર્શ્વે હિ તં તદા ।
વજ્રેણાઽન્યઃ પુમાઞ્જાતો વિશાખાખ્યોઽપરો બલી ॥ ૨૪॥

તતસ્તદ્ધૃદયં શક્રો જઘાન પવિના તદા ।
પરોઽભૂન્નૈગમોપાખ્યઃ પુમાંસ્તદ્વન્મહાબલઃ ॥ ૨૫॥

તદા સ્કન્દાદિચત્વારો મહાવીરા મહાબલાઃ ।
ઇન્દ્રં હન્તું દ્રુતં જગ્મુઃ સોઽયં તચ્છરણં યયૌ ॥ ૨૬॥

શક્રઃ સસામરગણો ભયં પ્રાપ્ય ગૃહાત્તતઃ ।
યયૌ સ્વલોકં ચકિતો ન ભેદં જ્ઞાતવાન્મુને ॥ ૨૭॥

સ બાલકસ્તુ તત્રૈવ તસ્થાઽઽવાનન્દસંયુતઃ ।
પૂર્વવન્નિર્ભયસ્તાત નાનાલીલાકરઃ પ્રભુઃ ॥ ૨૮॥

તસ્મિન્નવસરે તત્ર કૃત્તિકાખ્યાશ્ચ ષટ્ સ્ત્રિયઃ ।
સ્નાતું સમાગતા બાલં દદૃશુસ્તં મહાપ્રભુમ્ ॥ ૨૯॥

ગ્રહીતું તં મનશ્ચક્રુઃસર્વાસ્તા કૃત્તિકાઃ સ્ત્રિયઃ ।
વાદો બભૂવ તાસાં તદ્ગ્રહણેચ્છાપરો મુને ॥ ૩૦॥

તદ્વાદશમનાર્થં સ ષણ્મુખાનિ ચકાર હ ।
પપૌ દુગ્ધં ચ સર્વાસાં તુષ્ટાસ્તા અભવન્મુને ॥ ૩૧॥

તન્મનોગતિમાજ્ઞાય સર્વાસ્તાઃ કૃત્તિકાસ્તદા ।
તમાદાય યયુર્લોકં સ્વકીયં મુદિતા મુને ॥ ૩૨॥

તં બાલકં કુમારાખ્યં સ્તનં દત્ત્વા સ્તનાર્થિને ।
વર્દ્ધયામાસુરીશસ્ય સુતં સૂર્યાધિકપ્રભમ્ ॥ ૩૩॥

ન ચક્રુર્બાલકં યાશ્ચ લોચનાનામગોચરમ્ ।
પ્રાણેભ્યોઽપિ પ્રેમપાત્રં યઃ પોષ્ટા તસ્ય પુત્રકઃ ॥ ૩૪॥

યાનિ યાનિ ચ વસ્ત્રાણિ ત્રૈલોક્યે દુર્લભાનિ ચ ।
દદુસ્તસ્મૈ ચ તાઃ પ્રેમ્ણા ભૂષણાનિ વરાણિ વૈ ॥ ૩૫॥

દિને દિને તાઃ પુપુષુર્બાલકં તં મહાપ્રભુમ્ ।
પ્રશંસિતાનિ સ્વાદૂનિ ભોજયિત્વા વિશેષતઃ ॥ ૩૬॥

અથૈકસ્મિન્ દિને તાત સ બાલઃ કૃત્તિકાત્મજઃ ।
ગત્વા દેવસભાં દિવ્યાં સુચરિત્રં ચકાર હ ॥ ૩૭॥

સ્વમહો દર્શયામાસ દેવેભ્યો હિ મહાદ્ભુતમ્ ।
સવિષ્ણુભ્યોઽખિલેભ્યશ્ચ મહોતિકરબાલકઃ ॥ ૩૮॥

તં દૃષ્ટ્વા સકલાસ્તે વૈ સાચ્યુતાઃસર્ષયઃ સુરાઃ ।
વિસ્મયં પ્રાપુરત્યન્તં પપ્રચ્છુસ્તં ચ બાલકમ્ ॥ ૩૯॥

કો ભવાનિતિ તચ્છ્રુત્વા ન કિઞ્ચિત્સ જગાદ હ ।
સ્વાલયં સ જગામાશુ ગુપ્તસ્તસ્થૌ હિ પૂર્વવત્ ॥ ૪૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે કાર્તિકેયલીલાવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૨.૪.૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૪. ચતુર્થોઽધ્યાયઃ । કાર્તિકેયાન્વેષણનન્દિસંવાદવર્ણનમ્ ।

નારદ ઉવાચ ।
દેવદેવ પ્રજાનાથ તતઃ કિમભવદ્વિધે ।
વદેદાનીં કૃપાતસ્તુ શિવલીલાસમન્વિતમ્ ॥ ૧॥

બ્રહ્મોવાચ ।
કૃત્તિકાભિર્ગૃહીતે વૈ તસ્મિન્ શમ્ભુસુતે મુને ।
કશ્ચિત્કાલો વ્યતીયાય બુબુધે ન હિમાદ્રિજા ॥ ૨॥

તસ્મિન્નવસરે દુર્ગા સ્મેરાનનસરોરુહા ।
ઉવાચ સ્વામિનં શમ્ભું દેવદેવેશ્વરં પ્રભુમ્ ॥ ૩॥

પાર્વત્યુવાચ ।
દેવદેવ મહાદેવ શ ृણુ મે વચનં શુભમ્ ।
પૂર્વપુણ્યાતિભારેણ ત્વં મયા પ્રાપ્ત ઈશ્વરઃ ॥ ૪॥

કૃપયા યોગિષુ શ્રેષ્ઠો વિહારૈસ્તત્પરોઽભવઃ ।

રતિભઙ્ગઃ કૃતો દેવૈસ્તત્ર મે ભવતા ભવ ॥ ૫॥

ભૂમૌ નિપતિતં વીર્યં નોદરે મમ તે વિભો ।
કુત્ર યાતં ચ તદ્દેવ કેન દેવેન નિહ્નુતમ્ ॥ ૬॥

કથં મત્સ્વામિનો વીર્યમમોઘં તે મહેશ્વર ।
મોઘં યાતં ચ કિં કિં વા શિશુર્જાતશ્ચ કુત્રચિત્ ॥ ૭॥

બ્રહ્મોવાચ ।
પાર્વતીવચનં શ્રુત્વા પ્રહસ્ય જગદીશ્વરઃ ।
ઉવાચ દેવાનાહૂય મુનીંશ્ચાપિ મુનીશ્વર ॥ ૮॥

મહેશ્વર ઉવાચ ।
દેવાઃ શ‍ૃણુત મદ્વાક્યં પાર્વતીવચનં શ્રુતમ્ ।
અમોઘં કુત્ર મે વીર્યં યાતં કેન ચ નિહ્નુતમ્ ॥ ૯॥

સભયં નાપ તત્ક્ષિપ્રં સ ચેદ્દણ્ડં ન ચાર્હતિ ।
શક્તૌ રાજા ન શાસ્તા યઃ પ્રજાબાધ્યશ્ચ ભક્ષકઃ ॥ ૧૦॥

બ્રહ્મોવાચ
શમ્ભોસ્તદ્વચનં શ્રુત્વા સમાલોચ્ય પરસ્પરમ્ ।
ઊચુઃસર્વે ક્રમેણૈવ ત્રસ્તાસ્તુ પુરતઃ પ્રભોઃ ॥ ૧૧॥

વિષ્ણુરુવાચ ।
તે મિથ્યાવાદિનઃસન્તુ ભારતે ગુરુદારિકાઃ ।
ગુરુનિન્દારતાઃ શશ્વત્ત્વદ્વીર્યં યૈશ્ચ નિહ્નુતમ્ ॥ ૧૨॥

બ્રહ્મોવાચ ।
ત્વદ્વીર્યં નિહ્નુતં યેન પુણ્યક્ષેત્રે ચ ભારતે ।
સ નાઽન્વિતો ભવેત્તત્ર સેવને પૂજને તવ ॥ ૧૩॥

લોકપાલા ઊચુઃ ।
ત્વદવીર્યં નિહ્નુતં યેન પાપિના પતિતભ્રમાત્ ।
ભાજનં તસ્ય સોત્યન્તં તત્તાપં કર્મ સન્તતમ્ ॥ ૧૪॥

દેવા ઊચુઃ ।
કૃત્વા પ્રતિજ્ઞાં યો મૂઢો નાઽઽપાદયતિ પૂર્ણતામ્ ।
ભાજનં તસ્ય પાપસ્ય ત્વદ્વીર્યં યેન નિહ્નુતમ્ ॥ ૧૫॥

દેવપત્ન્ય ઊચુઃ ।
યા નિન્દતિ સ્વભર્તારં પરં ગચ્છતિ પૂરુષમ્ ।
માતૃબન્ધુવિહીના ચ ત્વદ્વીર્યં નિહ્નુતં યયા ॥ ૧૬॥

બ્રહ્મોવાચ ।
દેવાનાં વચનં શ્રુત્વા દેવદેવેશ્વરો હરઃ ।
કર્મણાં સાક્ષિણશ્ચાહ ધર્માદીન્સભયં વચઃ ॥ ૧૭॥

શ્રીશિવ ઉવાચ ।
દેવૈર્ન નિહ્નુતં કેન તદ્વીર્યં નિહ્નુતં ધ્રુવમ્ ।
તદમોઘં ભગવતો મહેશસ્ય મમ પ્રભોઃ ॥ ૧૮॥

યૂયં ચ સાક્ષિણો વિશ્વે સતતં સર્વકર્મણામ્ ।
યુષ્માકં નિહ્નુતં કિં વા કિં જ્ઞાતું વક્તુમર્હથ ॥ ૧૯॥

બ્રહ્મોવાચ ।
ઈશ્વરસ્ય વચઃ શ્રુત્વા સભાયાં કમ્પિતાશ્ચ તે ।
પરસ્પરં સમાલોક્ય ક્રમેણોચુઃ પુરઃ પ્રભોઃ ॥ ૨૦॥

બ્રહ્મોવાચ ।
રતે તુ તિષ્ઠતો વીર્યં પપાત વસુધાતલે ।
મયા જ્ઞાતમમોઘં તચ્છઙ્કરસ્ય પ્રકોપતઃ ॥ ૨૧॥

ક્ષિતિરુવાચ
વીર્યં સોઢુમશક્તાહં તદ્વહ્નૌ ન્યક્ષિપં પુરા ।
અતોઽત્ર દુર્વહં બ્રહ્મન્નબલાં ક્ષન્તુમર્હસિ ॥ ૨૨॥

વહ્નિરુવાચ
વીર્યં સોઢુમશક્તોઽહં તવ શઙ્કર પર્વતે ।
કૈલાસે ન્યક્ષિપં સદ્યઃ કપોતાત્મા સુદુસ્સહમ્ ॥ ૨૩॥

ગિરિરુવાચ
વીર્યં સોઢુમશક્તોઽહં તવ શઙ્કર લોકપ ।
ગઙ્ગાયાં પ્રાક્ષિપં સદ્યો દુસ્સહં પરમેશ્વર ॥ ૨૪॥

ગઙ્ગોવાચ
વીર્યં સોઢુમશક્તાહં તવ શઙ્કર લોકપ ।
વ્યાકુલાઽતિ પ્રભો નાથ ન્યક્ષિપં શરકાનને ॥ ૨૫॥

વાયુરુવાચ
શરેષુ પતિતં વીર્યં સદ્યો બાલો બભૂવ હ ।
અતીવ સુન્દરઃ શમ્ભો સ્વર્નદ્યાઃ પાવને તટે ॥ ૨૬॥

સૂર્ય ઉવાચ
રુદન્તં બાલકં દૃષ્ટ્વાગમમસ્તાચલં પ્રભો ।
પ્રેરિતઃ કાલચક્રેણ નિશાયાં સ્થાતુમક્ષમઃ ॥ ૨૭॥

ચન્દ્ર ઉવાચ
રુદન્તં બાલકં પ્રાપ્ય ગૃહીત્વા કૃત્તિકાગણઃ ।
જગામ સ્વાલયં શમ્ભો ગચ્છન્બદરિકાશ્રમમ્ ॥ ૨૮॥

જલમુવાચ
અમું રુદન્તમાનીય સ્તન્યપાનેન તાઃ પ્રભો ।
વર્દ્ધયામાસુરીશસ્ય સુતં તવ રવિપ્રભમ્ ॥ ૨૯॥

સન્ધ્યોવાચ
અધુના કૃત્તિકાનાં ચ વને તં પોષ્ય પુત્રકમ્ ।
તન્નામ ચક્રુસ્તાઃ પ્રેમ્ણા કાર્ત્તિકશ્ચેતિ કૌતુકાત્ ॥ ૩૦॥

રાત્રિરુવાચ
ન ચક્રુર્બાલકં તાશ્ચ લોચનાનામગોચરમ્ ।
પ્રાણેભ્યોઽપિ પ્રીતિપાત્રં યઃ પોષ્ટા તસ્ય પુત્રક ॥ ૩૧॥

દિનમુવાચ
યાનિ યાનિ ચ વસ્ત્રાણિ ભૂષણાનિ વરાણિ ચ ।
પ્રશંસિતાનિ સ્વાદૂનિ ભોજયામાસુરેવ તમ્ ॥ ૩૨॥

બ્રહ્મોવાચ
તેષાં તદ્વચનં શ્રુત્વા સન્તુષ્ટઃ પુરસૂદનઃ ।
મુદં પ્રાપ્ય દદૌ પ્રીત્યા વિપ્રેભ્યો બહુદક્ષિણામ્ ॥ ૩૩॥

પુત્રસ્ય વાર્ત્તાં સમ્પ્રાપ્ય પાર્વતી હૃષ્ટમાનસા ।
કોટિરત્નાનિ વિપ્રેભ્યો દદૌ બહુધનાનિ ચ ॥ ૩૪॥

લક્ષ્મી સરસ્વતી મેના સાવિત્રી સર્વયોષિતઃ ।
વિષ્ણુઃ સર્વે ચ દેવાશ્ચ બ્રાહ્મણેભ્યો દદુર્ધનમ્ ॥ ૩૫॥

પ્રેરિતઃ સ પ્રભુર્દેવૈર્મુનિભિઃ પર્વતૈરથ ।

દૂતાન્ પ્રસ્થાપયામાસ સ્વપુત્રો યત્ર તાન્ ગણાન્ ॥ ૩૬॥

વીરભદ્રં વિશાલાક્ષં શઙ્કુકર્ણં કરાક્રમમ્ ।
નન્દીશ્વરં મહાકાલં વજ્રદંષ્ટ્રં મહોન્મદમ્ ॥ ૩૭॥

ગોકર્ણાસ્યં દધિમુખં જ્વલદગ્નિશિખોપમમ્ ।
લક્ષં ચ ક્ષેત્રપાલાનાં ભૂતાનાં ચ ત્રિલક્ષકમ્ ॥ ૩૮॥

રુદ્રાંશ્ચ ભૈરવાંશ્ચૈવ શિવતુલ્યપરાક્રમાન્ ।
અન્યાંશ્ચ વિકૃતાકારાનસઙ્ખ્યાનપિ નારદ ॥ ૩૯॥

તે સર્વે શિવદૂતાશ્ચ નાનાશસ્ત્રાસ્ત્રપાણયઃ ।
કૃત્તિકાનાં ચ ભવનં વેષ્ટયામાસુરુદ્ધતાઃ ॥ ૪૦॥

દૃષ્ટ્વા તાન્ કૃત્તિકાઃસર્વા ભયવિહ્વલમાનસાઃ ।
કાર્ત્તિકં કથયામાસુર્જ્વલન્તં બ્રહ્મતેજસા ॥ ૪૧॥

કૃત્તિકા ઊચુઃ ।
વત્સ સૈન્યાન્યસઙ્ખ્યાનિ વેષ્ટયામાસુરાલયમ્ ।
કિં કર્તવ્યં ક્વ ગન્તવ્યં મહાભયમુપસ્થિતમ્ ॥ ૪૨॥

કાર્તિકેય ઉવાચ
ભયં ત્યજત કલ્યાણ્યો ભયં કિં વા મયિ સ્થિતે ।
દુર્નિવાર્યોઽસ્મિ બાલશ્ચ માતરઃ કેન વાર્યતે ॥ ૪૩॥

બ્રહ્મોવાચ
એતસ્મિન્નન્તરે તત્ર સૈન્યેન્દ્રો નન્દિકેશ્વરઃ ।
પુરતઃ કાર્તિકેયસ્યોપવિષ્ટઃ સમુવાચ હ ॥ ૪૪॥

નન્દીશ્વર ઉવાચ
ભ્રાતઃ પ્રવૃત્તિં શ◌ૃણુ મે માતરશ્ચ શુભાવહામ્ ।
પ્રેરિતોઽહં મહેશેન સંહર્ત્રા શઙ્કરેણ ચ ॥ ૪૫॥

કૈલાસે સર્વદેવાશ્ચ બ્રહ્મવિષ્ણુશિવાદયઃ ।
સભાયાં સંસ્થિતાસ્તાત મહત્યુત્સવમઙ્ગલે ॥ ૪૬॥

તદા શિવા સભાયાં વૈ શઙ્કરં સર્વ શઙ્કરમ્ ।
સમ્બોધ્ય કથયામાસ તવાન્વેષણહેતુકમ્ ॥ ૪૭॥

પપ્રચ્છ તાન્ શિવો દેવાન્ ક્રમાત્ત્વત્પ્રાપ્તિહેતવે ।

પ્રત્યુત્તરં દદુસ્તે તુ પ્રત્યેકં ચ યથોચિતમ્ ॥ ૪૮॥

ત્વામત્ર કૃત્તિકાસ્થાને કથયામાસુરીશ્વરમ્ ।
સર્વે ધર્માદયો ધર્માધર્મસ્ય કર્મસાક્ષિણઃ ॥ ૪૯॥

પ્રબભૂવ રહઃ ક્રીડા પાર્વતીશિવયોઃ પુરા ।
દૃષ્ટસ્ય ચ સુરૈઃ શમ્ભોર્વીર્યં ભૂમૌ પપાત હ ॥ ૫૦॥

ભૂમિસ્તદક્ષિપદ્વહ્નૌ વહ્નિશ્ચાદ્રૌ સ ભૂધરઃ ।
ગઙ્ગાયાં સોઽક્ષિપદ્વેગાત્ તરઙ્ગૈઃ શરકાનને ॥ ૫૧॥

તત્ર બાલોઽભવસ્ત્વં હિ દેવકાર્યકૃતિઃ પ્રભુઃ ।
તત્ર લબ્ધઃ કૃત્તિકાભિસ્ત્વં ભૂમિં ગચ્છ સામ્પ્રતમ્ ॥ ૫૨॥

તવાભિષેકં શમ્ભુસ્તુ કરિષ્યતિ સુરૈઃ સહ ।
લપ્સ્યસે સર્વશસ્ત્રાણિ તારકાખ્યં હનિષ્યસિ ॥ ૫૩॥

પુત્રસ્ત્વં વિશ્વસંહર્તુસ્ત્વાં પ્રાપ્તું ચાઽક્ષમા ઇમાઃ ।
નાગ્નિં ગોપ્તું યથા શક્તઃ શુષ્કવૃક્ષઃ સ્વકોટરે ॥ ૫૪॥

દીપ્તવાંસ્ત્વં ચ વિશ્વેષુ નાસાં ગેહેષુ શોભસે ।
યથા પતન્મહાકૂપે દ્વિજરાજો ન રાજતે ॥ ૫૫॥

કરોષિ ચ યથાઽઽલોકં નાઽઽચ્છન્નોઽસ્માસુ તેજસા ।
યથા સૂર્યઃ કલાચ્છન્નો ન ભવેન્માનવસ્ય ચ ॥ ૫૬॥

વિષ્ણુસ્ત્વં જગતાં વ્યાપી નાન્યો જાતોઽસિ શામ્ભવ ।
યથા ન કેષાં વ્યાપ્યં ચ તત્સર્વં વ્યાપકં નભઃ ॥ ૫૭॥

યોગીન્દ્રો નાઽનુલિપ્તશ્ચ ભાગી ચેત્પરિપોષણે ।
નૈવ લિપ્તો યથાત્મા ચ કર્મયોગેષુ જીવિનામ્ ॥ ૫૮॥

વિશ્વારમ્ભસ્ત્વમીશશ્ચ નાસુ તે સમ્ભવેત્ સ્થિતિઃ ।
ગુણાનાં તેજસાં રાશિર્યથાત્માનં ચ યોગિનઃ ॥ ૫૯॥

ભ્રાતર્યે ત્વાં ન જાનન્તિ તે નરા હતબુદ્ધયઃ ।
નાદ્રિયન્તે યથા ભેકાસ્ત્વેકવાસાશ્ચ પઙ્કજાન્ ॥ ૬૦॥

કાર્ત્તિકેય ઉવાચ
ભ્રાતઃસર્વં વિજાનાસિ જ્ઞાનં ત્રૈકાલિકં ચ યત્ ।
જ્ઞાની ત્વં કા પ્રશંસા તે યતો મૃત્યુઞ્જયાશ્રિતઃ ॥ ૬૧॥

કર્મણાં જન્મ યેષાં વા યાસુ યાસુ ચ યોનિષુ ।
તાસુ તે નિર્વૃતિં ભ્રાતઃ પ્રાપ્નુવન્તીહ સામ્પ્રતમ્ ॥ ૬૨॥

કૃત્તિકાજ્ઞાનવત્યશ્ચ યોગિન્યઃ પ્રકૃતેઃ કલાઃ ।
સ્તન્યેનાસાં વર્દ્ધિતોઽહમુપકારેણ સન્તતમ્ ॥ ૬૩॥

આસામહં પોષ્યપુત્રો મદંશા યોષિતસ્ત્વિમાઃ ।
તસ્યાશ્ચ પ્રકૃતેરંશાસ્તતસ્તત્સ્વામિવીર્યજઃ ॥ ૬૪॥

ન મદ્ભવો હે શૈલેન્દ્રકન્યયા નન્દિકેશ્વર ।
સા ચ મે ધર્મતો માતા યથેમાઃ સર્વસમ્મતાઃ ॥ ૬૫॥

શમ્ભુના પ્રેષિતસ્ત્વં ચ શમ્ભોઃ પુત્રસમો મહાન્ ।
આગચ્છામિ ત્વયા સાર્દ્ધં દ્રક્ષ્યામિ દેવતાકુલમ્ ॥ ૬૬॥

ઇત્યેવમુક્ત્વા તં શીઘ્રં સમ્બોધ્ય કૃત્તિકાગણમ્ ।
કાર્ત્તિકેયઃ પ્રતસ્થે હિ સાર્દ્ધં શઙ્કરપાર્ષદૈઃ ॥ ૬૭॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે કાર્ત્તિકેયાન્વેષણનન્દિસંવાદવર્ણનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૨.૪.૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૫. પઞ્ચમોઽધ્યાયઃ । દેવકૃતકુમારાભિષેકઃ ।

બ્રહ્મોવાચ
એતસ્મિન્નન્તરે તત્ર દદર્શ રથમુત્તમમ્ ।
અદ્ભુતં શોભિતં શશ્વદ્વિશ્વકર્મવિનિર્મિતમ્ ॥ ૧॥

શતચક્રં સુવિસ્તીર્ણં મનોયાયિ મનોહરમ્ ।
પ્રસ્થાપિતં ચ પાર્વત્યા વેષ્ટિતં પાર્ષદૈર્વરૈઃ ॥ ૨॥

સમારોહત્તતોઽનન્તો હૃદયેન વિદૂયતા ।
કાર્ત્તિકઃ પરમજ્ઞાની પરમેશાનવીર્યજઃ ॥ ૩॥

તદૈવ કૃત્તિકાઃ પ્રાપ્ય મુક્તકેશ્યઃ શુચાઽઽતુરાઃ ।
ઉન્મત્તા ઇવ તત્રૈવ વક્તુમારેભિરે વચઃ ॥ ૪॥

કૃત્તિકા ઊચુઃ ।
વિહાયાઽસ્માન્ કૃપાસિન્ધો ગચ્છસિ ત્વં હિ નિર્દયઃ ।
નાયં ધર્મો માતૃવર્ગાન્ પાલિતો યત્ સુતસ્ત્યજેત્ ॥ ૫॥

સ્નેહેન વર્દ્ધિતોઽસ્માભિઃ પુત્રોઽસ્માકં ચ ધર્મતઃ ।
કિં કુર્મઃ ક્વ ચ યાસ્યામો વયં કિં કરવામ હ ॥ ૬॥

ઇત્યુક્ત્વા કૃત્તિકાઃ સર્વાઃ કૃત્વા વક્ષસિ કાર્ત્તિકમ્ ।
દ્રુતં મૂર્ચ્છામવાપુસ્તાઃસુતવિચ્છેદકારણાત્ ॥ ૭॥

તાઃ કુમારો બોધયિત્વા અધ્યાત્મવચનેન વૈ ।
તાભિશ્ચ પાર્ષદૈઃ સાર્દ્ધમારુરોહ રથં મુને ॥ ૮॥

દૃષ્ટ્વા શ્રુત્વા મઙ્ગલાનિ બહૂનિ સુખદાનિ વૈ ।
કુમારઃ પાર્ષદૈઃ સાર્દ્ધં જગામ પિતૃમન્દિરમ્ ॥ ૯॥

દક્ષેણ નન્દિયુક્તશ્ચ મનોયાયિરથેન ચ ।
કુમારઃ પ્રાપ કૈલાસં ન્યગ્રોધાઽક્ષયમૂલકે ॥ ૧૦॥

તત્ર તસ્થૌ કૃત્તિકાભિઃ પાર્ષદપ્રવરૈઃ સહ ।
કુમારઃ શાઙ્કરિઃ પ્રીતો નાનાલીલાવિશારદઃ ॥ ૧૧॥

તદા સર્વે સુરગણા ઋષયઃ સિદ્ધચારણાઃ ।
વિષ્ણુના બ્રહ્મણા સાર્દ્ધં સમાચખ્યુસ્તદાગમમ્ ॥ ૧૨॥

તદા દૃષ્ટ્વા ચ ગાઙ્ગેયં યયૌ પ્રમુદિતશ્શિવઃ ।
અન્યૈઃ સમેતો હરિણા બ્રહ્મણા ચ સુરર્ષિભિઃ । ૧૩॥

શઙ્ખાશ્ચ બહવો નેદુર્ભેરી તૂર્યાણ્યનેકશઃ ।
ઉત્સવઃ સુમહાનાસીદ્દેવાનાં તુષ્ટચેતસામ્ ॥ ૧૪॥

તદાનીમેવ તં સર્વે વીરભદ્રાદયો ગણાઃ ।
કુર્વન્તઃ સ્વન્વયુઃ કેલિં નાનાતાલધરસ્વરાઃ ॥ ૧૫॥

સ્તાવકાઃ સ્તૂયમાનાશ્ચ ચક્રુસ્તે ગુણકીર્ત્તનમ્ ।
જયશબ્દં નમશ્શબ્દં કુર્વાણાઃ પ્રીતમાનસાઃ ॥ ૧૬॥

દ્રષ્ટું યયુસ્તં શરજં શિવાત્મજમનુત્તમમ્ । ૧૭॥

પાર્વતી મઙ્ગલં ચક્રે રાજમાર્ગં મનોહરમ્ ।
પદ્મરાગાદિમણિભિઃ સંસ્કૃતં પરિતઃ પુરમ્ ॥ ૧૮॥

પતિપુત્રવતીભિશ્ચ સાધ્વીભિઃ સ્ત્રીભિરન્વિતાઃ ।
લક્ષ્મ્યાદિત્રિંશદ્દેવીશ્ચ પુરઃ કૃત્વા સમાયયૌ ॥ ૧૯॥

રમ્ભાદ્યપ્સરસો દિવ્યાઃ સસ્મિતા વેષસંયુતાઃ ।
સઙ્ગીતનર્તનપરા બભૂવુશ્ચ શિવાજ્ઞયા ॥ ૨૦॥

યે તં સમીક્ષયામાસુર્ગાઙ્ગેયં શઙ્કરોપમમ્ ।
દદૃશુસ્તે મહત્તેજો વ્યાપ્તમાસીજ્જગત્ત્રયે ॥ ૨૧॥

તત્તેજસા વૃતં બાલં તપ્તચામીકરપ્રભમ્ ।
વવન્દિરે દ્રુતં સર્વે કુમારં સૂર્યવર્ચસમ્ ॥ ૨૨॥

જહૃષુર્વિનતસ્કન્ધા નમશ્શબ્દરતાસ્તદા ।
પરિવાર્યોપતસ્થુસ્તે વામદક્ષિણમાગતાઃ ॥ ૨૩॥

અહં વિષ્ણુશ્ચ શક્રશ્ચ તથા દેવાદયોઽખિલાઃ ।
દણ્ડવત્પતિતા ભૂમૌ પરિવાર્ય કુમારકમ્ ॥ ૨૪॥

એતસ્મિન્નન્તરે શમ્ભુર્ગિરિજા ચ મુદાન્વિતા ।
મહોત્સવં સમાગમ્ય દદર્શ તનયં મુદા ॥ ૨૫॥

પુત્રં નિરીક્ષ્ય ચ તદા જગદેકબન્ધુઃ
પ્રીત્યાન્વિતઃ પરમયા પરયા ભવાન્યા ।
સ્નેહાન્વિતો ભુજગભોગયુતો હિ સાક્ષાત્
સર્વેશ્વરઃ પરિવૃતઃ પ્રમથૈઃ પરેશઃ ॥ ૨૬॥

અથ શક્તિધરઃ સ્કન્દો દૃષ્ટ્વા તૌ પાર્વતીશિવૌ ।
અવરુહ્ય રથાત્તૂર્ણં શિરસા પ્રણનામ હ ॥ ૨૭॥

ઉપગુહ્ય શિવઃ પ્રીત્યા કુમારં મૂર્ધ્નિ શઙ્કરઃ ।
જઘ્રૌ પ્રેમ્ણા પરેશાનઃ પ્રસન્નઃ સ્નેહકર્તૃકઃ ॥ ૨૮॥

ઉપગુહ્ય ગુહં તત્ર પાર્વતી જાતસમ્ભ્રમા ।
પ્રસ્નુતં પાયયામાસ સ્તનં સ્નેહપરિપ્લુતા ॥ ૨૯॥

તદા નીરાજિતો દેવૈઃસકલત્રૈર્મુદાન્વિતૈઃ ।

જયશબ્દેન મહતા વ્યાપ્તમાસીન્નભસ્તલમ્ ॥ ૩૦॥

ઋષયો બ્રહ્મઘોષેણ ગીતેનૈવ ચ ગાયકાઃ ।
વાદ્યૈશ્ચ બહવસ્તત્રોપતસ્થુશ્ચ કુમારકમ્ ॥ ૩૧॥

સ્વમઙ્કમારોપ્ય તદા મહેશઃ
કુમારકં તં પ્રભયા સમુજ્જ્વલમ્ ।
બભૌ ભવાનીપતિરેવ સાક્ષા-
ચ્છ્રિયાઽન્વિતઃ પુત્રવતાં વરિષ્ઠઃ ॥ ૩૨॥

કુમારઃ સ્વગણૈઃ સાર્દ્ધમાજગામ શિવાલયમ્ ।
શિવાજ્ઞયા મહોત્સાહૈસ્સહ દેવૈર્મહાસુખી ॥ ૩૩॥

દમ્પતી તૌ તદા તત્રૈકપદ્યેન વિરેજતુઃ ।
વિવન્દ્યમાનાવૃષિભિરાવૃતૌ સુરસત્તમૈઃ ॥ ૩૪॥

કુમારઃ ક્રીડયામાસ શિવોત્સઙ્ગે મુદાન્વિતઃ ।
વાસુકિં શિવકણ્ઠસ્થં પાણિભ્યાં સમપીડયત્ ॥ ૩૫॥

પ્રહસ્ય ભગવાન્ શમ્ભુઃ શશંસ ગિરિજાં તદા ।
નિરીક્ષ્ય કૃપયા દૃષ્ટ્યા કૃપાલુર્લીલયાકૃતિમ્ ॥ ૩૬॥

મદસ્મિતેન ચ તદા ભગવાન્મહેશઃ
પ્રાપ્તો મુદં ચ પરમાં ગિરિજાસમેતઃ ।
પ્રેમ્ણા સ ગદ્ગદગિરો જગદેકબન્ધુ-
ર્નોવાચ કિઞ્ચન વિભુર્ભુવનૈકભર્ત્તા ॥ ૩૭॥

અથ શમ્ભુર્જગન્નાથો હૃષ્ટો લૌકિકવૃત્તવાન્ ।
રત્નસિંહાસને રમ્યે વાસયામાસ કાર્ત્તિકમ્ ॥ ૩૮॥

વેદમન્ત્રાભિપૂતૈશ્ચ સર્વતીર્થોદપૂર્ણકૈઃ ।
સદ્રત્નકુમ્ભશતકૈઃ સ્નાપયામાસ તં મુદા ॥ ૩૯॥

સદ્રત્નસારરચિતકિરીટમુકુટાઙ્ગદમ્ ।
વૈજયન્તીં સ્વમાલાં ચ તસ્મૈ ચક્રં દદૌ હરિઃ ॥ ૪૦॥

શૂલં પિનાકં પરશું શક્તિં પાશુપતં શરમ્ ।
સંહારાસ્ત્રં ચ પરમાં વિદ્યાં તસ્મૈ દદૌ શિવઃ ॥ ૪૧॥

અદામહં યજ્ઞસૂત્રં વેદાંશ્ચ વેદમાતરમ્ ।

કમણ્ડલું ચ બ્રહ્માસ્ત્રં વિદ્યાં ચૈવાઽરિમર્દિનીમ્ ॥ ૪૨॥

ગજેન્દ્રં ચૈવ વજ્રં ચ દદૌ તસ્મૈ સુરેશ્વરઃ ।
શ્વેતચ્છત્રં રત્નમાલાં દદૌ પાશં જલેશ્વરઃ ॥ ૪૩॥

મનોયાયિરથં સૂર્યઃ સન્નાહં ચ મહાચયમ્ ।
યમદણ્ડં યમશ્ચૈવ સુધાકુમ્ભં સુધાનિધિઃ ॥ ૪૪॥

હુતાશનો દદૌ પ્રીત્યા મહાશક્તિં સ્વસૂનવે ।
દદૌ સ્વશસ્ત્રં નિરૃતિર્વાયવ્યાસ્ત્રં સમીરણઃ ॥ ૪૫॥

ગદાં દદૌ કુબેરશ્ચ શૂલમીશો દદૌ મુદા ।
નાનાશસ્ત્રાણ્યુપાયાંશ્ચ સર્વે દેવા દદુર્મુદા ॥ ૪૬॥

કામાસ્ત્રં કામદેવોઽથ દદૌ તસ્મૈ મુદાન્વિતઃ ।
ગદાં દદૌ સ્વવિદ્યાશ્ચ તસ્મૈ ચ પરયા મુદા ॥ ૪૭॥

ક્ષીરોદોઽમૂલ્યરત્નાનિ વિશિષ્ટં રત્નનૂપુરમ્ ।
હિમાલયો હિ દિવ્યાનિ ભૂષણાન્યંશુકાનિ ચ ॥ ૪૮॥

ચિત્રબર્હણનામાનં સ્વપુત્રં ગરુડો દદૌ ।
અરુણસ્તામ્રચૂડાખ્યં બલિનં ચરણાયુધમ્ ॥ ૪૯॥

પાર્વતી સસ્મિતા હૃષ્ટા પરમૈશ્વર્યમુત્તમમ્ ।
દદૌ તસ્મૈ મહાપ્રીત્યા ચિરઞ્જીવિત્વમેવ ચ ॥ ૫૦॥

લક્ષ્મીશ્ચ સમ્પદં દિવ્યાં મહાહારં મનોહરમ્ ।
સાવિત્રી સિદ્ધવિદ્યાં ચ સમસ્તાં પ્રદદૌ મુદા ॥ ૫૧॥

અન્યાશ્ચાપિ મુને દેવ્યો યા યાસ્તત્ર સમાગતાઃ ।
સ્વાત્મવત્સુ દદુસ્તસ્મૈ તથૈવ શિશુપાલિકાઃ ॥ ૫૨॥

મહામહોત્સવસ્તત્ર બભૂવ મુનિસત્તમ ।
સર્વે પ્રસન્નતાં યાતા વિશેષાચ્ચ શિવાશિવૌ ॥ ૫૩॥

એતસ્મિન્નન્તરે કાલે પ્રોવાચ પ્રહસન્ મુદા ।
મુને બ્રહ્માદિકાન્ દેવાન્ રુદ્રો ભર્ગઃ પ્રતાપવાન્ ॥ ૫૪॥

શિવ ઉવાચ
હે હરે હે વિધે દેવાઃ સર્વે શ ૃણુત મદ્વચઃ ।
સર્વથાહં પ્રસન્નોઽસ્મિ વરાન્વૃણુત ઐચ્છિકાન્ ॥ ૫૫॥

બ્રહ્મોવાચ

તચ્છ્રુત્વા વચનં શમ્ભોર્મુને વિષ્ણ્વાદયઃ સુરાઃ ।
સર્વે પ્રોચુઃ પ્રસન્નાસ્યા દેવં પશુપતિં પ્રભુમ્ ॥ ૫૬॥

કુમારેણ હતો હ્યેષ તારકો ભવિતા પ્રભો ।
તદર્થમેવ સઞ્જાતમિદં ચરિતમુત્તમમ્ ॥ ૫૭॥

તસ્માદદ્યૈવ યાસ્યામસ્તારકં હન્તુમુદ્યતાઃ ।
આજ્ઞાં દેહિ કુમારાય સ તં હન્યાત્ સુખાય નઃ ॥ ૫૮॥

તથેતિ મત્વા સ વિભુર્દત્તવાંસ્તનયં તદા ।
દેવેભ્યસ્તારકં હન્તું કૃપયા પરિભાવિતઃ ॥ ૫૯॥

શિવાજ્ઞયા સુરાઃ સર્વે બ્રહ્મવિષ્ણુમુખાસ્તદા ।
પુરસ્કૃત્ય ગુહં સદ્યો નિર્જગ્મુર્મિલિતા ગિરેઃ ॥ ૬૦॥

બહિર્નિસ્સૃત્ય કૈલાસાત્ત્વષ્ટા શાસનતો હરેઃ ।
વિરેચે નગરં રમ્યમદ્ભુતં નિકટે ગિરેઃ ॥ ૬૧॥

તત્ર રમ્યં ગૃહં દિવ્યમદ્ભુતં પરમોજ્જ્વલમ્ ।
ગુહાર્થં નિર્મમે ત્વષ્ટા તત્ર સિંહાસનં વરમ્ ॥ ૬૨॥

તદા હરિઃ સુધીર્ભક્ત્યા કારયામાસ મઙ્ગલમ્ ।
કાર્ત્તિકસ્યાભિષેકં હિ સર્વતીર્થજલૈઃ સુરૈઃ ॥ ૬૩॥

સર્વથા સમલઙ્કૃત્ય વાસયામાસ સઙ્ગ્રહમ્ ।
કાર્ત્તિકસ્ય વિધિં પ્રીત્યા કારયામાસ ચોત્સવમ્ ॥ ૬૪॥

બ્રહ્માણ્ડાધિપતિત્વં હિ દદૌ તસ્મૈ મુદા હરિઃ ।
ચકાર તિલકં તસ્ય સમાનર્ચ સુરૈસ્સહ ॥ ૬૫॥

પ્રણમ્ય કાર્ત્તિકં પ્રીત્યા સર્વદેવર્ષિભિઃ સહ ।
તુષ્ટાવ વિવિધૈઃ સ્તોત્રૈઃ શિવરૂપં સનાતનમ્ ॥ ૬૬॥

વરસિંહાસનસ્થો હિ શુશુભેઽતીવ કાર્ત્તિકઃ ।
સ્વામિભાવં સમાપન્નો બ્રહ્માણ્ડસ્યાપિ પાલકઃ ॥ ૬૭॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે કુમારાભિષેકવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥
૨.૪.૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૬. ષષ્ઠોઽધ્યાયઃ । કુમારાદ્ભુતચરિત્રવર્ણનમ્ ।

બ્રહ્મોવાચ
અથ તત્ર સ ગાઙ્ગેયો દર્શયામાસ સૂતિકામ્ ।
તામેવ શ‍ૃણુ સુપ્રીત્યા નારદ ત્વં સ્વભક્તિદામ્ ॥ ૧॥

દ્વિજ એકો નારદાખ્ય આજગામ તદૈવ હિ ।
તત્રાધ્વરકરઃ શ્રીમાન્ શરણાર્થં ગુહસ્ય વૈ ॥ ૨॥

સ વિપ્રઃ પ્રાપ્ય નિકટં કાર્ત્તિકસ્ય પ્રસન્નધીઃ ।
સ્વાભિપ્રાયં સમાચખ્યૌ સુપ્રણમ્ય શુભૈઃ સ્તવૈઃ ॥ ૩॥

વિપ્ર ઉવાચ
શ‍ૃણુ સ્વામિન્વચો મેઽદ્ય કષ્ટં મે વિનિવારય ।
સર્વબ્રહ્માણ્ડનાથસ્ત્વમતસ્તે શરણં ગતઃ ॥ ૪॥

અજમેધાધ્વરં કર્તુમારમ્ભં કૃતવાનહમ્ ।
સોઽજો ગતો ગૃહાન્મે હિ ત્રોટયિત્વા સ્વબન્ધનમ્ ॥ ૫॥

ન જાને સ ગતઃ કુત્રાઽન્વેષણં તત્કૃતં બહુ ।
ન પ્રાપ્તોઽતસ્સ બલવાન્ ભઙ્ગો ભવતિ મે ક્રતોઃ ॥ ૬॥

ત્વયિ નાથે સતિ વિભો યજ્ઞભઙ્ગઃ કથં ભવેત્ ।
વિચાર્યૈવાઽખિલેશાન કામં પૂર્ણં કુરુષ્વ મે ॥ ૭॥

ત્વાં વિહાય શરણ્યં કં યાયાં શિવસુત પ્રભો ।
સર્વબ્રહ્માણ્ડનાથં હિ સર્વામરસુસેવિતમ્ ॥ ૮॥

દીનબન્ધુર્દયાસિન્ધુઃ સુસેવ્યો ભક્તવત્સલઃ ।
હરિબ્રહ્માદિદેવૈશ્ચ સુસ્તુતઃ પરમેશ્વરઃ ॥ ૯॥

પાર્વતીનન્દનસ્સ્કન્દઃ પરમેકઃ પરન્તપઃ ।
પરમાત્માઽત્મદઃ સ્વામી સતાં ચ શરણાર્થિનામ્ ॥ ૧૦॥

દીનાનાથ મહેશ શઙ્કરસુત ત્રૈલોક્યનાથ પ્રભો
માયાધીશ સમાગતોઽસ્મિ શરણં માં પાહિ વિપ્રપ્રિય ।
ત્વં સર્વપ્રભુરાનતાઽખિલવિદ્બ્રહ્માદિદેવૈઃ સ્તુતઃ
ત્વં માયાકૃતિરાત્મભક્તસુખદો રક્ષાપરો માયિકઃ ॥ ૧૧॥

ભક્તપ્રાણગુણાકરસ્ત્રિગુણતો ભિન્નોઽસિ શમ્ભુપ્રિયઃ
શમ્ભુઃ શમ્ભુસુતઃ પ્રસન્નસુખદઃ સચ્ચિત્સ્વરૂપો મહાન્ ।
સર્વજ્ઞસ્ત્રિપુરઘ્નશઙ્કરસુતઃ સત્પ્રેમવશ્યઃસદા
ષડ્વક્ત્રઃ પ્રિયસાધુરાનતપ્રિયઃ સર્વેશ્વરઃ શઙ્કરઃ ।
સાધુદ્રોહકરઘ્ન શઙ્કરગુરો બ્રહ્માણ્ડનાથો પ્રભુઃ
સર્વેષામમરાદિસેવિતપદો માં પાહિ સેવાપ્રિય ॥ ૧૨॥

વૈરિભયઙ્કર શઙ્કર જનશરણસ્ય
વન્દે તવ પદપદ્મં સુખકરણસ્ય ।
વિજ્ઞપ્તિં મમ કર્ણે સ્કન્દ નિધેહિ
નિજભક્તિં જનચેતસિ સદા વિધેહિ ॥ ૧૩॥

કરોતિ કિં તસ્ય બલી વિપક્ષો
દક્ષોઽપિ પક્ષોભયપાર્શ્વગુપ્તઃ ।
કિં તક્ષકોઽપ્યામિષભક્ષકો વા
ત્વં રક્ષકો યસ્ય સદક્ષમાનઃ ॥ ૧૪॥

વિબુધગુરુરપિ ત્વાં સ્તોતુમીશો ન હિ સ્યાત્
કથય કથમહં સ્યાં મન્દબુદ્ધિર્વરાર્ચ્યઃ ।
શુચિરશુચિરનાર્યો યાદૃશસ્તાદૃશો વા
પદકમલપરાગં સ્કન્દ તે પ્રાર્થયામિ ॥ ૧૫॥

હે સર્વેશ્વર ભક્તવત્સલ કૃપા-સિન્ધો ત્વદીયોઽસ્મ્યહં
ભૃત્યઃ સ્વસ્ય ન સેવકસ્ય ગણપ-સ્યાગઃશતં સત્પ્રભો ।
ભક્તિં ક્વાપિ કૃતાં મનાગપિ વિભો જાનાસિ ભૃત્યાર્તિહા
ત્વત્તો નાસ્ત્યપરોઽવિતા ન ભગવન્ મત્તો નરઃ પામરઃ ॥ ૧૬॥

કલ્યાણકર્ત્તા કલિકલ્મષઘ્નઃ
કુબેરબન્ધુઃ કરુણાર્દ્રચિત્તઃ ।
ત્રિષટ્કનેત્રો રસવક્ત્રશોભી
યજ્ઞં પ્રપૂર્ણં કુરુ મે ગુહ ત્વમ્ ॥ ૧૭॥

રક્ષકસ્ત્વં ત્રિલોકસ્ય શરણાગતવત્સલઃ ।
યજ્ઞકર્ત્તા યજ્ઞભર્ત્તા હરસે વિઘ્નકારિણામ્ ॥ ૧૮॥

વિઘ્નવારણ સાધૂનાં સર્ગ કારણ સર્વતઃ ।
પૂર્ણં કુરુ મમેશાન સુતયજ્ઞ નમોસ્તુ તે ॥ ૧૯॥

સર્વત્રાતા સ્કન્દ હિ ત્વં સર્વજ્ઞાતા ત્વમેવ હિ ।
સર્વેશ્વરસ્ત્વમીશાનો નિવેશસકલાઽવનઃ ॥ ૨૦॥

સઙ્ગીતજ્ઞસ્ત્વમેવાસિ વેદવિજ્ઞઃ પરઃ પ્રભુઃ ।
સર્વસ્થાતા વિધાતા ત્વં દેવદેવઃ સતાં ગતિઃ ॥ ૨૧॥

ભવાનીનન્દનઃ શમ્ભુતનયો વયુનઃ સ્વરાટ્ ।
ધ્યાતા ધ્યેયઃ પિતૃણાં હિ પિતા યોનિઃ સદાત્મનામ્ ॥ ૨૨॥

બ્રહ્મોવાચ
ઇત્યાકર્ણ્ય વચસ્તસ્ય દેવસમ્રાટ્ શિવાત્મજઃ ।
સ્વગણં વીરબાહ્વાખ્યં પ્રેષયામાસ તત્કૃતે ॥ ૨૩॥

તદાજ્ઞયા વીરબાહુસ્તદન્વેષણહેતવે ।
પ્રણમ્ય સ્વામિનં ભક્ત્યા મહાવીરો દ્રુતં યયૌ ॥ ૨૪॥

અન્વેષણં ચકારાસૌ સર્વબ્રહ્માણ્ડગોલકે ।
ન પ્રાપ તમજં કુત્ર શુશ્રાવ તદુપદ્રવમ્ ॥ ૨૫॥

જગામાઽથ સ વૈકુણ્ઠં તત્રાઽજં પ્રદદર્શ તમ્ ।
ઉપદ્રવં પ્રકુર્વન્તં ગલયૂપં મહાબલમ્ ॥ ૨૬॥

ધૃત્વા તં શૃઙ્ગયોર્વીરો ધર્ષયિત્વાતિવેગતઃ ।
આનિનાય સ્વામિપુરો વિકુર્વન્તં રવં બહુ ॥ ૨૭॥

દૃષ્ટ્વા તં કાર્ત્તિકસ્સોઽરમારુરોહ સ તં પ્રભુઃ ।
ધૃતબ્રહ્માણ્ડગરિમા મહાસૂતિકરો ગુહઃ ॥ ૨૮॥

મુહૂર્તમાત્રતસ્સોઽજો બ્રહ્માણ્ડં સકલં મુને ।
બભ્રામ શ્રમ એવાશુ પુનસ્તત્સ્થાનમાગતઃ ॥ ૨૯॥

તત ઉત્તીર્ય સ સ્વામી સમુવાસ સ્વમાસનમ્ ।
સોઽજઃ સ્થિતસ્તુ તત્રૈવ સ નારદ ઉવાચ તમ્ ॥ ૩૦॥

નારદ ઉવાચ

નમસ્તે દેવ દેવેશ દેહિ મેઽજં કૃપાનિધે ।
કુર્યામધ્વરમાનન્દાત્સખાયં કુરુ મામહો ॥ ૩૧॥

કાર્ત્તિક ઉવાચ
વધયોગ્યો ન વિપ્રાઽજઃ સ્વગૃહં ગચ્છ નારદ ।
પૂર્ણોઽસ્તુ તેઽધ્વરઃ સર્વઃ પ્રસાદાદેવ મે કૃતઃ ॥ ૩૨॥

બ્રહ્મોવાચ
ઇત્યાકર્ણ્ય દ્વિજઃસ્વામી વચનં પ્રીતમાનસઃ ।
જગામ સ્વાલયં દત્ત્વા તસ્મા આશિષમુત્તમામ્ ॥ ૩૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે કુમારાદ્ભુતચરિતવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૨.૪.૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૭. સપ્તમોઽધ્યાયઃ । તારકેણ સહેન્દ્રાદિદેવાનાં યુદ્ધવર્ણનમ્ ।

બ્રહ્મોવાચ
હર્ય્યાદયસ્સુરાસ્તે ચ દૃષ્ટ્વા તચ્ચરિતં વિભોઃ ।
સુપ્રસન્ના બભૂવુર્હિ વિશ્વાસાસક્તમાનસાઃ ॥ ૧॥

વલ્ગન્તઃ કુર્વતો નાદં ભાવિતાશ્શિવતેજસા ।
કુમારન્તે પુરસ્કૃત્ય તારકં હન્તુમાયયુઃ ॥ ૨॥

દેવાનામુદ્યમં શ્રુત્વા તારકોઽપિ મહાબલઃ ।
સૈન્યેન મહતા સદ્યો યયૌ યોદ્ધું સુરાન્ પ્રતિ ॥ ૩॥

દેવા દૃષ્ટ્વા સમાયાન્તં તારકસ્ય મહાબલમ્ ।
બલેન બહુકુર્વન્તઃ સિંહનાદં વિસિસ્મિયુઃ ॥ ૪॥

તદા નભોઽઙ્ગના વાણીં જગાદોપરિ સત્વરમ્ ।
શઙ્કરપ્રેરિતા સદ્યો હર્યાદીનખિલાન્ સુરાન્ ॥ ૫॥

વ્યોમવાણ્યુવાચ

કુમારં ચ પુરસ્કૃત્ય સુરા યૂયં સમુદ્યતાઃ ।
દૈત્યાન્વિજિત્ય સઙ્ગ્રામે જયિનોઽથ ભવિષ્યથ ॥ ૬॥

બ્રહ્મોવાચ
વાચં તુ ખેચરીં શ્રુત્વા દેવાઃ સર્વે સમુત્સુકાઃ ।
વીરશબ્દાન્ પ્રકુર્વન્તો નિર્ભયા હ્યભવંસ્તદા ॥ ૭॥

કુમારં ચ પુરસ્કૃત્ય સર્વે તે ગતસાધ્વસાઃ ।
યોદ્ધુકામાઃ સુરા જગ્મુર્મહીસાગરસઙ્ગમમ્ ॥ ૮॥

આજગામ દ્રુતં તત્ર યત્ર દેવાઃ સ તારકઃ ।
સૈન્યેન મહતા સાર્દ્ધં અસુરૈર્બહુભિર્વૃતઃ ॥ ૯॥

રણદુન્દુભયો નેદુઃ પ્રલયામ્બુદનિઃસ્વનાઃ ।
કર્કશાનિ ચ વાદ્યાનિ પરાણિ ચ તદાગમે ॥ ૧૦॥

ગર્જમાનાસ્તદા દૈત્યાસ્તારકેણાસુરેણ હ ।
કમ્પયન્તો ભુવં પાદક્રમૈર્વલ્ગુનકારકાઃ ॥ ૧૧॥

તચ્છ્રુત્વા રવમત્યુગ્રં સર્વે દેવા વિનિર્ભયાઃ ।
ઐકપદ્યેન ચોત્તસ્થુર્યોદ્ધુકામાશ્ચ તારકમ્ ॥ ૧૨॥

ગજમારોપ્ય દેવેન્દ્રઃ કુમારં હ્યગ્રતોઽભવત્ ।
સુરસૈન્યેન મહતા લોકપાલૈઃ સમાવૃતઃ ॥ ૧૩॥

તદા દુન્દુભયો નેદુર્ભેરીતૂર્યાણ્યનેકશઃ ।
વીણાવેણુમૃદઙ્ગાનિ તથા ગન્ધર્વનિસ્સ્વનાઃ ॥ ૧૪॥

ગજં દત્ત્વા મહેન્દ્રાય કુમારો યાનમારુહત્ ।
અનેકાશ્ચર્યસમ્ભૂતં નાનારત્નસમન્વિતમ્ ॥ ૧૫॥

વિમાનમારુહ્ય તદા મહાયશાઃ
સ શાઙ્કરિઃસર્વગુણૈરુપેતઃ ।
શ્રિયા સમેતઃ પરયા બભૌ મહાન્
સંવીજ્યમાનશ્ચમરૈર્મહાપ્રભૈઃ ॥ ૧૬॥

પ્રાચેતસં છત્રમતીવસુપ્રભં
રત્નૈરુપેતં વિવિધૈર્વિરાજિતમ્ ।
ધૃતં તદા તચ્ચ કુમારમૂર્ધ્નિ વૈ

હ્યનન્તચાન્દ્રૈઃ કિરણૈર્મહાપ્રભૈઃ ॥ ૧૭॥

મિલિતાસ્તે તદા સર્વે દેવાઃ શક્રપુરોગમાઃ ।
સ્વૈઃ સ્વૈર્બલૈઃ પરિવૃતા યુદ્ધકામા મહાબલાઃ ॥ ૧૮॥

એવં દેવાશ્ચ દૈત્યાશ્ચ યોદ્ધુકામાઃ સ્થિતા ભુવિ ।
સૈન્યેન મહતા તેન વ્યૂહં કૃત્વા પૃથક્ પૃથક્ ॥ ૧૯॥

તે સેને સુરદૈત્યાનાં શુશુભાતે પરસ્પરમ્ ।
હન્તુકામે તદાન્યોન્યં સ્તૂયમાને ચ બન્દિભિઃ ॥ ૨૦॥

ઉભે સેને તદા તેષામગર્જેતાં વનોપમે ।
ભયઙ્કરેઽત્યવીરાણામિતરેષાં સુખાવહે ॥ ૨૧॥

એતસ્મિન્નન્તરે તત્ર બલોન્મત્તાઃ પરસ્પરમ્ ।
દૈત્યા દેવા મહાવીરા યુયુધુઃ ક્રોધવિહ્વલાઃ ॥ ૨૨॥

આસીત્સુતુમુલં યુદ્ધં દેવદૈત્યસમાકુલમ્ ।
રુણ્ડમુણ્ડાઙ્કિતં સર્વં ક્ષણેન સમપદ્યત ॥ ૨૩॥

ભૂમૌ નિપતિતાસ્તત્ર શતશોઽથ સહસ્રશઃ ।
નિકૃત્તાઙ્ગા મહાશસ્ત્રૈર્નિહતા વીરસમ્મતાઃ ॥ ૨૪॥

કેષાઞ્ચિદ્બાહવશ્છિન્નાઃ ખડ્ગપાતૈઃ સુદારુણૈઃ ।
કેષાઞ્ચિદૂરવશ્છિન્ના વીરાણાં માનિનાં મૃધે ॥ ૨૫॥

કેચિન્મથિતસર્વાઙ્ગા ગદાભિર્મુદ્ગરૈસ્તથા ।
કેચિન્નિર્ભિન્નહૃદયાઃ પાશૈર્ભલ્લૈશ્ચ પાતિતાઃ ॥ ૨૬॥

કેચિદ્વિદારિતાઃ પૃષ્ઠે કુન્તૈરૃષ્ટિભિરઙ્કુશૈઃ ।
છિન્નાન્યપિ શિરાંસ્યેવ પતિતાનિ ચ ભૂતલે ॥ ૨૭॥

બહૂનિ ચ કબન્ધાનિ નૃત્યમાનાનિ તત્ર વૈ ।
વલ્ગમાનાનિ શતશો ઉદ્યતાસ્ત્રકરાણિ ચ ॥ ૨૮॥

નદ્યઃ પ્રવર્તિતાસ્તત્ર શતશોઽસૃઙ્વહાસ્તદા ।
ભૂતપ્રેતાદયસ્તત્ર શતશશ્ચ સમાગતાઃ ॥ ૨૯॥

ગોમાયવશ્શિવાઃ તત્ર ભક્ષયન્તઃ પલં બહુ ।
તથા ગૃધ્રવટા શ્યેના વાયસા માંસભક્ષકાઃ ॥

બુભુજુઃ પતિતાનાં ચ પલાનિ સુબહૂનિ વૈ । ૩૦॥

એતસ્મિન્નન્તરે તત્ર તારકાખ્યો મહાબલઃ ।
સૈન્યેન મહતા સદ્યો યયૌ યોદ્ધું સુરાન્ પ્રતિ ॥ ૩૧॥

દેવા દૃષ્ટ્વા સમાયાન્તં તારકં યુદ્ધદુર્મદમ્ ।
યોદ્ધુકામં તદા સદ્યો યયુઃ શક્રાદયસ્તદા ।
બભૂવાથ મહોન્નાદઃસેનયોરુભયોરપિ ॥ ૩૨॥

અથાભૂદ્ દ્વન્દ્વયુદ્ધં હિ સુરાસુરવિમર્દનમ્ ।
યં દૃષ્ટ્વા હર્ષિતા વીરાઃ ક્લીબાશ્ચ ભયમાગતાઃ ॥ ૩૩॥

તારકો યુયુધે યુદ્ધે શક્રેણ દિતિજો બલી ।
અગ્નિના સહ સંહ્રાદો જમ્ભેનૈવ યમઃ સ્વયમ્ ॥ ૩૪॥

મહાપ્રભુર્નૈરૃતેન પાશી સહ બલેન ચ ।
સુવીરો વાયુના સાર્ધં પવમાનેન ગુહ્યરાટ્ ॥ ૩૫॥

ઈશાનેન સમં શમ્ભુર્યુયુધે રણવિત્તમઃ ।
શુમ્ભઃ શેષેણ યુયુધે કુમ્ભશ્ચન્દ્રેણ દાનવઃ ॥ ૩૬॥

કુઞ્જરો મિહિરેણાજૌ મહાબલપરાક્રમઃ ।
યુયુધે પરમાસ્ત્રૈશ્ચ નાનાયુદ્ધવિશારદઃ ॥ ૩૭॥

એવં દ્વન્દ્વેન યુદ્ધેન મહતા ચ સુરાસુરાઃ ।
સઙ્ગરે યુયુધુઃસર્વે બલેન કૃતનિશ્ચયાઃ ॥ ૩૮॥

અન્યોન્યં સ્પર્દ્ધમાનાસ્તેઽમરા દૈત્યા મહાબલાઃ ।
તસ્મિન્દેવાસુરે યુદ્ધે દુર્જયા અભવન્મુને ॥ ૩૯॥

તદા ચ તેષાં સુરદાનવાનાં
બભૂવ યુદ્ધં તુમુલં જયૈષિણામ્ ।
સુખાવહં વીરમનસ્વિનાં વૈ
ભયાવહં ચૈવ તથેતરેષામ્ ॥ ૪૦॥

મહી મહારૌદ્રતરા વિનષ્ટૈઃ
સુરાસુરૈર્વૈ પતિતૈરનેકશઃ ।
તસ્મિન્નગમ્યાતિભયાનકા તદા
જાતા મહાસૌખ્યવહા મનસ્વિનામ્ ॥ ૪૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે યુદ્ધપ્રારમ્ભવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૨.૪.૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૮. અષ્ટમોઽધ્યાયઃ । દેવદૈત્યયુદ્ધવર્ણનમ્ ।

બ્રહ્મોવાચ
ઇતિ તે વર્ણિતસ્તાત દેવદાનવ સેનયોઃ ।
સઙ્ગ્રામસ્તુમુલોઽતીવ તત્પ્રભ્વોઃ શ઼ૃણુ નારદ ॥ ૧॥

એવં યુદ્ધેઽતિતુમુલે દેવદાનવસઙ્ક્ષયે ।
તારકેણૈવ દેવેન્દ્રઃ શક્ત્યા પરમયા સહ ॥ ૨॥

સદ્યઃ પપાત નાગાશ્ચ ધરણ્યાં મૂર્ચ્છિતોઽભવત્ ।
પરં કશ્મલમાપેદે વજ્રધારી સુરેશ્વરઃ ॥ ૩॥

તથૈવ લોકપાઃ સર્વેઽસુરૈશ્ચ બલવત્તરૈઃ ।
પરાજિતા રણે તાત મહારણવિશારદૈઃ ॥ ૪॥

અન્યેઽપિ નિર્જરા દૈત્યૈર્યુદ્ધ્યમાનાઃ પરાજિતાઃ ।
અસહન્તો હિ તત્તેજઃ પલાયનપરાયણાઃ ॥ ૫॥

જગર્જુરસુરાસ્તત્ર જયિનઃ સુકૃતોદ્યમાઃ ।
સિંહનાદં પ્રકુર્વન્તઃ કોલાહલપરાયણાઃ ॥ ૬॥

એતસ્મિન્નન્તરે તત્ર વીરભદ્રો રુષાન્વિતઃ ।
આસસાદ ગણૈર્વીરૈસ્તારકં વીરમાનિનમ્ ॥ ૭॥

નિર્જરાન્ પૃષ્ઠતઃ કૃત્વા શિવકોપોદ્ભવો બલી ।
તત્સમ્મુખો બભૂવાથ યોદ્ધુકામો ગણાગ્રણીઃ ॥ ૮॥

તદા તે પ્રમથાઃ સર્વે દૈત્યાશ્ચ પરમોત્સવાઃ ।
યુયુધુઃ સંયુગેઽન્યોન્યં પ્રસક્તાશ્ચ મહારણે ॥ ૯॥

ત્રિશૂલૈરૃષ્ટિભિઃ પાશૈઃ ખડ્ગૈઃ પરશુપટ્ટિશૈઃ ।

નિજઘ્નુઃસમરેઽન્યોઽન્યં રણે રણવિશારદાઃ ॥ ૧૦॥

તારકો વીરભદ્રેણ સ ત્રિશૂલાહતો ભૃશમ્ ।
પપાત સહસા ભૂમૌ ક્ષણં મૂર્છાપરિપ્લુતઃ ॥ ૧૧॥

ઉત્થાય સ દ્રુતં વીરસ્તારકો દૈત્યસત્તમઃ ।
લબ્ધસંજ્ઞો બલાચ્છક્ત્યા વીરભદ્રં જઘાન હ ॥ ૧૨॥

વીરભદ્રસ્તથા વીરો મહાતેજા હિ તારકમ્ ।
જઘાન ત્રિશિખેનાશુ ઘોરેણ નિશિતેન તમ્ ॥ ૧૩॥

સોઽપિ શક્ત્યા વીરભદ્રં જઘાન સમરે તતઃ ।
તારકો દિતિજાધીશઃ પ્રબલો વીરસમ્મતઃ ॥ ૧૪॥

એવં સંયુદ્ધ્યમાનૌ તૌ જઘ્નતુશ્ચેતરેતરમ્ ।
નાનાસ્ત્રશસ્ત્રૈઃ સમરે રણવિદ્યાવિશારદૌ ॥ ૧૫॥

તયોર્મહાત્મનોસ્તત્ર દ્વન્દ્વયુદ્ધમભૂત્તદા ।
સર્વેષાં પશ્યતામેવ તુમુલં રોમહર્ષણમ્ ॥ ૧૬॥

તતો ભેરીમૃદઙ્ગાશ્ચ પટહાનકગોમુખાઃ ।
વિનેદુર્વિહતા વીરૈઃ શૃણ્વતાં સુભયાનકાઃ ॥ ૧૭॥

યુયુધાતેતિસન્નદ્ધૌ પ્રહારૈર્જર્જરીકૃતૌ ।
અન્યોઽન્યમતિસંરબ્ધૌ તૌ બુધાઙ્ગારકાવિવ ॥ ૧૮॥

એવં દૃષ્ટ્વા તદા યુદ્ધં વીરભદ્રસ્ય તેન ચ ।
તત્ર ગત્વા વીરભદ્રમવોચસ્ત્વં શિવપ્રિયઃ ॥ ૧૯॥

નારદ ઉવાચ
વીરભદ્ર મહાવીર ગણાનામગ્રણીર્ભવાન્ ।
નિવર્તસ્વ રણાદસ્માદ્રોચતે ન વધસ્ત્વયા ॥ ૨૦॥

એવં નિશમ્ય ત્વદ્વાક્યં વીરભદ્રો ગણાગ્રણીઃ ।
અવદત્સ રુષાવિષ્ટસ્ત્વાં તદા તુ કૃતાઞ્જલિઃ ॥ ૨૧॥

વીરભદ્ર ઉવાચ
મુનિવર્ય મહાપ્રાજ્ઞ શૃણુ મે પરમં વચઃ ।
તારકં ચ વધિષ્યામિ પશ્ય મેઽદ્ય પરાક્રમમ્ ॥ ૨૨॥

આનયન્તિ ચ યે વીરાઃસ્વામિનં રણસંસદિ ।

તે પાપિનો મહાક્લીબા વિનશ્યન્તિ રણં ગતાઃ ॥ ૨૩॥

અસદ્ગતિં પ્રાપ્નુવન્તિ તેષાં ચ નિરયો ધ્રુવમ્ ।
વીરભદ્રો હિ વિજ્ઞેયો ન વાચ્યસ્તે કદાચન ॥ ૨૪॥

શસ્ત્રાસ્ત્રૈર્ભિન્નગાત્રા યે રણં કુર્વન્તિ નિર્ભયાઃ ।
ઇહામુત્ર પ્રશંસ્યાસ્તે લભન્તે સુખમદ્ભુતમ્ ॥ ૨૫॥

શ઼ૃણ્વન્તુ મમ વાક્યાનિ દેવા હરિપુરોગમાઃ ।
અતારકાં મહીમદ્ય કરિષ્યે સ્વામિવર્જિતઃ ॥ ૨૬॥

ઇત્યુક્ત્વા પ્રમથૈસ્સાર્દ્ધં વીરભદ્રો હિ શૂલધૃક્ ।
વિચિન્ત્ય મનસા શમ્ભું યુયુધે તારકેણ હિ ॥ ૨૭॥

વૃષારૂઢૈરનેકૈશ્ચ ત્રિશૂલવરધારિભિઃ ।
મહાવીરૈઃ ત્રિનેત્રૈશ્ચ સ રેજે રણસઙ્ગતઃ ॥ ૨૮॥

કોલાહલં પ્રકુર્વન્તો નિર્ભયાઃ શતશો ગણાઃ ।
વીરભદ્રં પુરસ્કૃત્ય યુયુધુર્દાનવૈઃ સહ ॥ ૨૯॥

અસુરાસ્તેઽપિ યુયુધુઃ તારકાસુરજીવિનઃ ।
બલોત્કટા મહાવીરા મર્દયન્તો ગણાન્ રુષા ॥ ૩૦॥

પુનઃ પુનશ્ચૈવ બભૂવ સઙ્ગરો
મહોત્કટો દૈત્યવરૈર્ગણાનામ્ ।
પ્રહર્ષમાણાઃ પરમાસ્ત્રકોવિદાઃ
તદા ગણાસ્તે જયિનો બભૂવુઃ ॥ ૩૧॥

ગણૈર્જિતાસ્તે પ્રબલૈરસુરા વિમુખા રણે ।
પલાયનપરા જાતા વ્યથિતા વ્યગ્રમાનસાઃ ॥ ૩૨॥

એવં ભ્રષ્ટં સ્વસૈન્યં તદ્ દૃષ્ટ્વા તત્પાલકોઽસુરઃ ।
તારકો હિ રુષાવિષ્ટો હન્તું દેવગણાન્ યયૌ ॥ ૩૩॥

ભુજાનામયુતં કૃત્વા સિંહમારુહ્ય વેગતઃ ।
પાતયામાસ તાન્દેવાન્ ગણાંશ્ચ રણમૂર્દ્ધનિ ॥ ૩૪॥

સ દૃષ્ટ્વા તસ્ય તત્કર્મ વીરભદ્રો ગણાગ્રણીઃ ।
ચકાર સુમહત્કોપં તદ્વધાય મહાબલી ॥ ૩૫૮॥

સ્મૃત્વા શિવપદામ્ભોજં જગ્રાહ ત્રિશિખં પરમ્ ।

જજ્વલુસ્તેજસા તસ્ય દિશઃ સર્વા નભસ્તથા ॥ ૩૬॥

એતસ્મિન્નન્તરે સ્વામી વારયામાસ તં રણાત્ ।
વીરબાહુમુખાન્સર્વો મહાકૌતુકદર્શકઃ ॥ ૩૭॥

તદાજ્ઞયા વીરભદ્રો નિવૃત્તોઽભૂદ્રણાત્તદા ।
કોપં ચક્રે મહાવીરસ્તારકોઽસુરનાયકઃ ॥ ૩૮॥

ચકાર બાણવૃષ્ટિં ચ સુરોપરિ તદાઽસુરઃ ।
તમોઽઽહ્વાસીત્સુરાન્સર્વો નાનાસ્ત્રરણકોવિદઃ ॥ ૩૯॥

એવં કૃત્વા મહત્કર્મ તારકોઽસુરપાલકઃ ।
સર્વેષામપિ દેવાનામશક્યો બલિનાં વરઃ ॥ ૪૦॥

એવં નિહન્યમાનાંસ્તાન્ દૃષ્ટ્વા દેવાન્ ભયાકુલાન્ ।
કોપં કૃત્વા રણાયાશુ સન્નદ્ધોઽભવદચ્યુતઃ ॥ ૪૧॥

ચક્રં સુદર્શનં શાર્ઙ્ગ ધનુરાદાય સાયુધઃ ।
અભ્યુદ્યયૌ મહાદૈત્યં રણાય ભગવાન્ હરિઃ ॥ ૪૨॥

તતઃસમભવદ્યુદ્ધં હરિતારકયોર્મહત્ ।
લોમહર્ષણમત્યુગ્રં સર્વેષાં પશ્યતાં મુને ॥ ૪૩॥

ગદામુદ્યમ્ય સ હરિર્જઘાનાસુરમોજસા ।
દ્વિધા ચકાર તાં દૈત્યસ્ત્રિશિખેન મહાબલી ॥ ૪૪॥

તતઃ સ ક્રુદ્ધો ભગવાન્દેવાનામભયઙ્કરઃ ।
શાર્ઙ્ગચ્યુતૈઃ શરવ્યૂહૈર્જઘાનાસુરનાયકમ્ ॥ ૪૬॥

સોઽપિ દૈત્યો મહાવીરસ્તારકઃ પરવીરહા ।
ચિચ્છેદ સકલાન્બાણાન્સ્વશરૈર્નિશિતૈર્દ્રુતમ્ ॥ ૪૬॥

અથ શક્ત્યા જઘાનાશુ મુરારિં તારકાસુરઃ ।
ભૂમૌ પપાત સ હરિસ્તત્પ્રહારેણ મૂર્ચ્છિતઃ ॥ ૪૭॥

જગ્રાહ સ રુષા ચક્રમુત્થિતઃ ક્ષણતોઽચ્યુતઃ ।
સિંહનાદં મહત્કૃત્વા જ્વલજ્જ્વાલાસમાકુલમ્ ॥ ૪૮॥

તેન તં ચ જઘાનાસૌ દૈત્યાનામધિપં હરિઃ ।
તત્પ્રહારેણ મહતા વ્યથિતો ન્યપતદ્ભુવિ ॥ ૪૯॥

પુનશ્ચોત્થાય દૈત્યેન્દ્રસ્તારકોઽસુરનાયકઃ ।
ચિચ્છેદ ત્વરિતં ચક્રં સ્વશક્ત્યાતિબલાન્વિતઃ ॥ ૫૦॥

પુનસ્તયા મહાશક્ત્યા જઘાનામરવલ્લભમ્ ।
અચ્યુતોઽપિ મહાવીરો નન્દકેન જઘાન તમ્ ॥ ૫૧॥

એવમન્યોઽન્યમસુરો વિષ્ણુશ્ચ બલવાનુભૌ ।
યુયુધાતે રણે ભૂરિ તત્રાક્ષતબલૌ મુને ॥ ૫૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે દેવ દૈત્યસામાન્યયુદ્ધવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૨.૪.૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૯. નવમોઽધ્યાયઃ । તારકેણ સહ વીરભદ્રવિષ્ણોર્ઘોરયુદ્ધવર્ણનમ્ ।

બ્રહ્મોવાચ
દેવદેવ ગુહ સ્વામિન્ શાઙ્કરે પાર્વતીસુત ।
ન શોભતે રણો વિષ્ણુતારકાસુરયોર્વૃથા ॥ ૧॥

વિષ્ણુના ન હિ વધ્યોઽસૌ તારકો બલવાનતિ ।
મયા દત્તવરસ્તસ્માત્સત્યં સત્યં વદામ્યહમ્ ॥ ૨॥

નાન્યો હન્તાસ્ય પાપસ્ય ત્વાં વિના પાર્વતીસુત ।
તસ્માત્ત્વયા હિ કર્તવ્યં વચનં મે મહાપ્રભો ॥ ૩॥

સન્નદ્ધો ભવ દૈત્યસ્ય વધાયાશુ પરન્તપ ।
તદ્વધાર્થં સમુત્પન્નઃ શઙ્કરાત્ત્વં શિવાસુત ॥ ૪॥

રક્ષ રક્ષ મહાવીર ત્રિદશાન્ વ્યથિતાન્ રણે ।
ન બાલસ્ત્વં યુવા નૈવ કિં તુ સર્વેશ્વરઃ પ્રભુઃ ॥ ૫॥

શક્રં પશ્ય તથા વિષ્ણું વ્યાકુલં ચ સુરાન્ ગણાન્ ।
એનં જહિ મહાદૈત્યં ત્રૈલોક્યં સુખિતં કુરુ ॥ ૬॥

અનેન વિજિતશ્ચેન્દ્રો લોકપાલૈઃ પુરા સહ ।

વિષ્ણુશ્ચાપિ મહાવીરો તર્જિતસ્તપસો બલાત્ ॥ ૭॥

ત્રૈલોક્યં નિર્જિતં સર્વમસુરેણ દુરાત્મના ।
ઇદાનીં તવ સાન્નિધ્યાત્પુનર્યુદ્ધં કૃતં ચ તૈઃ ॥ ૮॥

તસ્માત્ત્વયા નિહન્તવ્યસ્તારકઃ પાપપૂરુષઃ ।
અન્યવધ્યો ન ચૈવાયં મદ્વરાચ્છઙ્કરાત્મજ ॥ ૯॥

ઇતિ શ્રુત્વા મમ વચઃ કુમારઃ શઙ્કરાત્મજઃ ।
વિજહાસ પ્રસન્નાત્મા તથાસ્ત્વિતિ વચોઽબ્રવીત્ ॥ ૧૦॥

વિનિશ્ચિત્યાસુરવધં શાઙ્કરિઃસ મહાપ્રભુઃ ।
વિમાનાદવતીર્યાથ પદાતિરભવત્તદા ॥ ૧૧॥

પદ્ભ્યાં તદાસૌ પરિધાવમાનો
રેજેઽતિવીરઃ શિવજઃ કુમારઃ ।
કરે સમાદાય મહાપ્રભાં તાં
શક્તિં મહોલ્કામિવ દીપ્તિદીપ્તામ્ ॥ ૧૨॥

દૃષ્ટ્વા તમાયાન્તમતિપ્રચણ્ડ-
મવ્યાકુલં ષણ્મુખમપ્રમેયમ્ ।
દૈત્યો બભાષે સુરસત્તમાન્સ
કુમાર એષ દ્વિષતાં પ્રહન્તા ॥ ૧૩॥

અનેન સાકં હ્યહમેકવીરો
યોત્સ્યે ચ સર્વાનહમેવ વીરાન્ ।
ગણાંશ્ચ સર્વાનપિ ઘાતયામિ
સલોકપાલાન્ હરિનાયકાંશ્ચ ॥ ૧૪॥

ઇત્યેવમુક્ત્વા સ તદા મહાબલઃ
કુમારમુદ્દિશ્ય યયૌ ચ યોદ્ધુમ્ ।
જગ્રાહ શક્તિં પરમાદ્ભુતાં ચ
સ તારકો દેવવરાન્ બભાષે ॥ ૧૫॥

તારક ઉવાચ
કુમારો મેઽગ્રતશ્ચાદ્ય ભવદ્ભિશ્ચ કથં કૃતઃ ।
યૂયં ગતત્રપા દેવા વિશેષાચ્છક્રકેશવૌ ॥ ૧૬॥

પુરૈતાભ્યાં કૃતં કર્મ વિરુદ્ધં વેદમાર્ગતઃ ।

તચ્છૃણુધ્વં મયા પ્રોક્તં વર્ણયામિ વિશેષતઃ ॥ ૧૭॥

તત્ર વિષ્ણુશ્છલી દોષી હ્યવિવેકી વિશેષતઃ ।
બલિર્યેન પુરા બદ્ધશ્છલમાશ્રિત્ય પાપતઃ ॥ ૧૮॥

તેનૈવ યત્નતઃ પૂર્વમસુરૌ મધુકૈટભૌ ।
શિરોહીનૌ કૃતૌ ધૌર્ત્યાદ્વેદમાર્ગો વિવર્જિતઃ ॥ ૧૯॥

મોહિનીરૂપતોઽનેન પઙ્ક્તિભેદઃ કૃતો હિ વૈ ।
દેવાસુરસુધાપાને વેદમાર્ગો વિગર્હિતઃ ॥ ૨૦॥

રામો ભૂત્વા હતા નારી વાલી વિધ્વંસિતો હિ સઃ ।
પુનર્વૈશ્રવણો વિપ્રો હતો નીતિર્હતા શ્રુતેઃ ॥ ૨૧॥

પાપં વિના સ્વકીયા સ્ત્રી ત્યક્તા પાપરતેન યત્ ।
તત્રાપિ શ્રુતિમાર્ગશ્ચ ધ્વંસિતઃ સ્વાર્થહેતવે ॥ ૨૨॥

સ્વજનન્યાઃ શિરશ્છિન્નમવતારે રસાખ્યકે ।
ગુરુપુત્રાપમાનશ્ચ કૃતોઽનેન દુરાત્મના ॥ ૨૩॥

કૃષ્ણો ભૂત્વાન્યનાર્યશ્ચ દૂષિતાઃ કુલધર્મતઃ ।
શ્રુતિમાર્ગં પરિત્યજ્ય સ્વવિવાહાઃ કૃતાસ્તથા ॥ ૨૪॥

પુનશ્ચ વેદમાર્ગો હિ નિન્દિતો નવમે ભવે ।
સ્થાપિતં નાસ્તિકમતં વેદમાર્ગવિરોધકૃત્ ॥ ૨૫॥

એવં યેન કૃતં પાપં વેદમાર્ગં વિસૃજ્ય વૈ ।
સ કથં વિજયેદ્યુદ્ધે ભવેદ્ધર્મવતાં વરઃ ॥ ૨૬॥

ભ્રાતા જ્યેષ્ઠશ્ચ યસ્તસ્ય શક્રઃ પાપી મહાન્મતઃ ।
તેન પાપાન્યનેકાનિ કૃતાનિ નિજહેતુતઃ ॥ ૨૭॥

નિકૃત્તો હિ દિતેર્ગર્ભઃ સ્વાર્થ હેતોર્વિશેષતઃ ।
ધર્ષિતા ગૌતમસ્ત્રી વૈ હતો વૃત્રશ્ચ વિપ્રજઃ ॥ ૨૮॥

વિશ્વરૂપદ્વિજાતેર્વૈ ભાગિનેયસ્ય યદ્ગુરોઃ ।
નિકૃત્તાનિ ચ શીર્ષાણિ તદધ્વાધ્વંસિતઃ શ્રુતેઃ ॥ ૨૯॥

કૃત્વા બહૂનિ પાપાનિ હરિઃ શક્રઃ પુનઃપુનઃ ।
તેજોભિર્વિહતાવેવ નષ્ટવીર્યૌ વિશેષતઃ ॥ ૩૦॥

તયોર્બલેન નો યૂયં સઙ્ગ્રામે જયમાપ્સ્યથ ।
કિમર્થં મૂઢતાં પ્રાપ્ય પ્રાણાંસ્ત્યક્તુમિહાગતાઃ ॥ ૩૧॥

જાનન્તૌ ધર્મમેતૌ ન સ્વાર્થલમ્પટમાનસૌ ।
ધર્મં વિનાઽમરાઃ કૃત્યં નિષ્ફલં સકલં ભવેત્ ॥ ૩૨॥

મહાધૃષ્ટાવિમૌ મેઽદ્ય કૃતવન્તૌ પુરશ્શિશુમ્ ।
અહં બાલં વધિષ્યામિ તયોઃ સોઽપિ ભવિષ્યતિ ॥ ૩૩॥

કિં તુ બાલ ઇતો યાયાદ્ દૂરં પ્રાણપરીપ્સયા ।
ઇત્યુક્ત્વોદ્દિશ્ય ચ હરી વીરભદ્રમુવાચ સઃ ॥ ૩૪॥

પુરા હતાસ્ત્વયા વિપ્રા દક્ષયજ્ઞે હ્યનેકશઃ ।
તત્કર્મણઃ ફલં ચાદ્ય દર્શયિષ્યામિ તેઽનઘ ॥ ૩૫॥

બ્રહ્મોવાચ
ઇત્યેવમુક્ત્વા તુ વિધૂય પુણ્યં
નિજં સ તન્નિન્દનકર્મણા વૈ ।
જગ્રાહ શક્તિં પરમાદ્ભુતાં ચ
સ તારકો યુદ્ધવતાં વરિષ્ઠઃ ॥ ૩૬॥

તં બાલાન્તિકમાયાન્તં તારકાસુરમોજસા ।
આજઘાન ચ વજ્રેણ શક્રો ગુહપુરસ્સરઃ ॥ ૩૭॥

તેન વજ્રપ્રહારેણ તારકો જર્જરીકૃતઃ ।
ભૂમૌ પપાત સહસા નિન્દાહતબલઃ ક્ષણમ્ ॥ ૩૮॥

પતિતોઽપિ સમુત્થાય શક્ત્યા તં પ્રાહરદ્રુષા ।
પુરન્દરં ગજસ્થં હિ પાતયામાસ ભૂતલે ॥ ૩૯॥

હાહાકારો મહાનાસીત્પતિતે ચ પુરન્દરે ।
સેનાયાં નિર્જરાણાં હિ તદ્ દૃષ્ટ્વા ક્લેશ આવિશત્ ॥ ૪૦॥

તારકેણાઽપિ તત્રૈવ યત્કૃતં કર્મ દુઃખદમ્ ।
સ્વનાશકારણં ધર્મવિરુદ્ધં તન્નિબોધ મે ॥ ૪૧॥

પતિતં ચ પદાક્રમ્ય હસ્તાદ્વજ્રં પ્રગૃહ્ય વૈ ।
પુનરુદ્વજ્રઘાતેન શક્રમાતાડયદ્ભૃશમ્ । ૪૨॥

એવં તિરસ્કૃતં દૃષ્ટ્વા શક્રં વિષ્ણુઃ પ્રતાપવાન્ ।

ચક્રમુધસ્ય ભગવાંસ્તારકં સ જઘાન હ ॥ ૪૩॥

ચક્રપ્રહારાભિહતો નિપપાત ક્ષિતૌ હિ સઃ ।
પુનરુત્થાય દૈત્યેન્દ્રઃ શક્ત્યા વિષ્ણું જઘાન તમ્ ॥ ૪૪॥

તેન શક્તિપ્રહારેણ પતિતો ભુવિ ચાચ્યુતઃ ।
હાહાકરો મહાનાસીચ્ચુક્રુશુશ્ચાઽતિનિર્જરાઃ ॥ ૪૫॥

નિમેષેણ પુનર્વિષ્ણુર્યાવદુત્તિષ્ઠતે સ્વયમ્ ।
તાવત્સ વીરભદ્રો હિ તત્ક્ષણાદાગતોઽસુરમ્ ॥ ૪૬॥

ત્રિશૂલં ચ સમુદ્યમ્ય વીરભદ્રઃ પ્રતાપવાન્ ।
તારકં દિતિજાધીશં જઘાન પ્રસભં બલી ॥ ૪૭॥

તત્ત્રિશૂલપ્રહારેણ સ પપાત ક્ષિતૌ તદા ।
પતિતોઽપિ મહાતેજાસ્તારકઃ પુનરુત્થિતઃ ॥ ૪૮॥

કૃત્વા ક્રોધં મહાવીરઃસકલાસુરનાયકઃ ।
જઘાન પરયા શક્ત્યા વીરભદ્રં તદોરસિ ॥ ૪૯॥

વીરભદ્રોઽપિ પતિતો ભૂતલે મૂર્છિતઃ ક્ષણમ્ ।
તચ્છક્ત્યા પરયા ક્રોધાન્નિહતો વક્ષસિ ધ્રુવમ્ ॥ ૫૦॥

સગણાશ્ચૈવ દેવાસ્તે ગન્ધર્વોરગરાક્ષસાઃ ।
હાહાકારેણ મહતા ચુક્રુશુશ્ચ મુહુર્મુહુઃ ॥ ૫૧॥

નિમેષમાત્રાત્સહસા મહૌજાઃ
સ્સ વીરભદ્રો દ્વિષતાં નિહન્તા ।
ત્રિશૂલમુદ્યમ્ય તડિત્પ્રકાશં
જાજ્વલ્યમાનં પ્રભયા વિરેજે ॥ ૫૨॥

સ્વરોચિષા ભાસિતદિગ્વિતાનં
સૂર્યેન્દુબિમ્બાગ્નિસમાનમણ્ડલમ્ ।
મહાપ્રભં વીરભયાવહં પરં
કાલાખ્યમત્યન્તકરં મહોજ્જ્વલમ્ ॥ ૫૩॥

યાવત્ત્રિશૂલેન તદા હન્તુકામો મહાબલઃ ।
વીરભદ્રોઽસુરં તાવત્કુમારેણ નિવારિતઃ ॥ ૫૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે તારકવાક્યશક્રવિષ્ણુવીરભદ્રયુદ્ધવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૨.૪.૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૧૦. દશમોઽધ્યાયઃ । તારકાસુરવધઃ દેવોત્સવવર્ણનઞ્ચ ।

બ્રહ્મોવાચ
નિવાર્ય વીરભદ્રં તં કુમારઃ પરવીરહા ।
સમૈચ્છત્તારકવધં સ્મૃત્વા શિવપદામ્બુજૌ ॥ ૧॥

જગર્જાથ મહાતેજાઃ કાર્તિકેયો મહાબલઃ ।
સન્નદ્ધઃ સોઽભવત્ક્રુદ્ધઃ સૈન્યેન મહતા વૃતઃ ॥ ૨॥

તદા જય જયેત્યુક્તં સર્વૈર્દેવગણૈસ્તથા ।
સંસ્તુતો વાગ્ભિરિષ્ટાભિસ્તદૈવ ચ સુરર્ષિભિઃ ॥ ૩॥

તારકસ્ય કુમારસ્ય સઙ્ગ્રામોઽતીવ દુઃસહઃ ।
જાતસ્તદા મહાઘોરઃ સર્વભૂત ભયઙ્કરઃ ॥ ૪॥

શક્તિહસ્તૌ ચ તૌ વીરૌ યુયુધાતે પરસ્પરમ્ ।
સર્વેષાં પશ્યતાં તત્ર મહાશ્ચર્યવતાં મુને ॥ ૫॥

શક્તિનિર્ભિન્નદેહૌ તૌ મહાસાધનસંયુતૌ ।
પરસ્પરં વઞ્ચયન્તૌ સિંહાવિવ મહાબલૌ ॥ ૬॥

વૈતાલિકં સમાશ્રિત્ય તથા ખેચરકં મતમ્ ।
પ્રાપતં ચ સમાશ્રિત્ય શક્ત્યા શક્તિં વિજઘ્નતુઃ ॥ ૭॥

એભિર્મન્ત્રૈર્મહાવીરૌ ચક્રતુર્યુદ્ધમદ્ભુતમ્ ।
અન્યોઽન્યં સાધકૌ ભૂત્વા મહાબલપરાક્રમૌ ॥ ૮॥

મહાબલં પ્રકુર્વન્તૌ પરસ્પરવધૈષિણૌ ।
જઘ્નતુઃ શક્તિધારાભી રણે રણવિશારદૌ ॥ ૯॥

મૂર્ધ્નિ કણ્ઠે તથા ચોર્વોર્જાન્વોશ્ચૈવ કટીતટે ।

વક્ષસ્યુરસિ પૃષ્ઠે ચ ચિચ્છિદુશ્ચ પરસ્પરમ્ ॥ ૧૦॥

તદા તૌ યુધ્યમાનૌ ચ હન્તુકામૌ મહાબલૌ ।
વલ્ગન્તૌ વીરશબ્દૈશ્ચ નાનાયુદ્ધવિશારદૌ ॥ ૧૧॥

અભવન્પ્રેક્ષકાઃ સર્વે દેવા ગન્ધર્વકિન્નરાઃ ।
ઊચુઃ પરસ્પરં તત્ર કોઽસ્મિન્ યુદ્ધે વિજેષ્યતે ॥ ૧૨॥

તદા નભોગતા વાણી જગૌ દેવાંશ્ચ સાન્ત્વયન્ ।
અસુરં તારકં ચાત્ર કુમારોઽયં હનિષ્યતિ ॥ ૧૩॥

મા શોચ્યતાં સુરૈઃ સર્વૈ સુખેન સ્થીયતામિતિ ।
યુષ્મદર્થં શઙ્કરો હિ પુત્રરૂપેણ સંસ્થિતઃ ॥ ૧૪॥

શ્રુત્વા તદા તાં ગગને સમીરિતાં
વાચં શુભાં સ પ્રમથૈઃ સમાવૃતઃ ।
નિહન્તુકામઃ સુખિતઃ કુમારકો
દૈત્યાધિપં તારકમાશ્વભૂત્તદા ॥ ૧૫॥

શક્ત્યા તયા મહાબાહુરાજઘાન સ્તનાન્તરે ।
કુમારઃ સ્મ રુષાવિષ્ટસ્તારકાસુરમોજસા ॥ ૧૬॥

તં પ્રહારમનાદૃત્ય તારકો દૈત્યપુઙ્ગવઃ ।
કુમારં ચાપિ સઙ્ક્રુદ્ધઃ સ્વશક્ત્યા સઞ્જઘાન સઃ ॥ ૧૭॥

તેન શક્તિપ્રહારેણ શાઙ્કરિર્મૂર્ચ્છિતોઽભવત્ ।
મુહૂર્તાચ્ચેતનાં પ્રાપ સ્તૂયમાનો મહર્ષિભિઃ ॥ ૧૮॥

યથા સિંહો મદોન્મત્તો હન્તુકામસ્તથાસુરમ્ ।
કુમારસ્તારકં શક્ત્યા સ જઘાન પ્રતાપવાન્ ॥ ૧૯॥

એવં પરસ્પરં તૌ હિ કુમારશ્ચાપિ તારકઃ ।
યુયુધાતેઽતિસંરબ્ધૌ શક્તિયુદ્ધવિશારદૌ ॥ ૨૦॥

અભ્યાસપરમાવાસ્તામન્યોન્યં વિજિગીષયા ।
પદાતિનૌ યુધ્યમાનૌ ચિત્રરૂપૌ તરસ્વિનૌ ॥ ૨૧॥

વિવિધૈર્ઘાતપુઞ્જૈસ્તાવન્યોન્યં વિનિજઘ્નતુઃ ।
નાનામાર્ગાન્પ્રકુર્વન્તૌ ગર્જન્તૌ સુપરાક્રમૌ ॥ ૨૨॥

અવલોકપરાઃ સર્વે દેવગન્ધર્વકિન્નરાઃ ।

વિસ્મયં પરમં જગ્મુર્નોચુઃ કિઞ્ચન તત્ર તે ॥ ૨૩॥

ન વવૌ પવમાનશ્ચ નિષ્પ્રભોઽભૂદ્દિવાકરઃ ।
ચચાલ વસુધા સર્વા સશૈલવનકાનના ॥ ૨૪॥

એતસ્મિન્નન્તરે તત્ર હિમાલયમુખા ધરાઃ ।
સ્નેહાર્દિતાસ્તદા જગ્મુઃ કુમારં ચ પરીપ્સવઃ ॥ ૨૫॥

તતઃ સ દૃષ્ટ્વા તાન્સર્વાન્ભયભીતાંશ્ચ શાઙ્કરિઃ ।
પર્વતાન્ગિરિજાપુત્રો બભાષે પરિબોધયન્ ॥ ૨૬॥

કુમાર ઉવાચ
મા ખિદ્યતાં મહાભાગા મા ચિન્તાં કુર્વતાં નગાઃ ।
ઘાતયામ્યદ્ય પાપિષ્ઠં સર્વેષાં વઃ પ્રપશ્યતામ્ ॥ ૨૭॥

એવં સમાશ્વાસ્ય તદા પર્વતાન્ નિર્જરાન્ ગણાન્ ।
પ્રણમ્ય ગિરિજાં શમ્ભુમાદદે શક્તિમુત્પ્રભામ્ ॥ ૨૮॥

તં તારકં હન્તુમનાઃ કરશક્તિર્મહાપ્રભુઃ ।
વિરરાજ મહાવીરઃ કુમારઃ શમ્ભુબાલકઃ ॥ ૨૯॥

શક્ત્યા તયા જઘાનાથ કુમારસ્તારકાસુરમ્ ।
તેજસાઢ્યઃ શઙ્કરસ્ય લોકક્લેશકરં ચ તમ્ ॥ ૩૦॥

પપાત સદ્યઃ સહસા વિશીર્ણાઙ્ગોઽસુરઃ ક્ષિતૌ ।
તારકાખ્યો મહાવીરઃસર્વાસુરગણાધિપઃ ॥ ૩૧॥

કુમારેણ હતઃ સોઽતિવીરઃ સ ખલુ તારકઃ ।
લયં યયૌ ચ તત્રૈવ સર્વેષાં પશ્યતાં મુને ॥ ૩૨॥

તથા તં પતિતં દૃષ્ટ્વા તારકં બલવત્તરમ્ ।
ન જઘાન પુનર્વીરઃ સ ગત્વા વ્યસુમાહવે ॥ ૩૩॥

હતે તસ્મિન્મહાદૈત્યે તારકાખ્યે મહાબલે ।
ક્ષયં પ્રણીતા બહવોઽસુરા દેવગણૈસ્તદા ॥ ૩૪॥

કેચિદ્ભીતાઃ પ્રાઞ્જલયો બભૂવુસ્તત્ર ચાહવે ।
છિન્નભિન્નાઙ્ગકાઃ કેચિન્મૃતા દૈત્યાઃસહસ્રશઃ ॥ ૩૫॥

કેચિજ્જાતાઃ કુમારસ્ય શરણં શરણાર્થિનઃ ।
વદન્તઃ પાહિ પાહીતિ દૈત્યાઃ સાઞ્જલયસ્તદા ॥ ૩૬॥

કિયન્તશ્ચ હતાસ્તત્ર કિયન્તશ્ચ પલાયિતાઃ ।
પલાયમાના વ્યથિતાસ્તાડિતા નિર્જરૈર્ગણૈઃ ॥ ૩૭॥

સહસ્રશઃ પ્રવિષ્ટાસ્તે પાતાલે ચ જિજીષવઃ ।
પલાયમાનાસ્તે સર્વે ભગ્નાશા દૈન્યમાગતાઃ ॥ ૩૮॥

એવં સર્વં દૈત્યસૈન્યં ભ્રષ્ટં જાતં મુનીશ્વર ।
ન કેચિત્તત્ર સન્તસ્થુર્ગણદેવભયાત્તદા ॥ ૩૯॥

આસીન્નિષ્કણ્ટકં સર્વં હતે તસ્મિન્દુરાત્મનિ ।
તે દેવાઃ સુખમાપન્નાઃ સર્વે શક્રાદયસ્તદા ॥ ૪૦॥

એવં વિજયમાપન્નં કુમારં નિખિલાઃ સુરાઃ ।
બભૂવુર્યુગપદ્ હૃષ્ટાસ્ત્રિલોકાશ્ચ મહાસુખા ॥ ૪૧॥

તદા શિવોઽપિ તં જ્ઞાત્વા વિજયં કાર્તિકસ્ય ચ ।
તત્રાજગામ સ મુદા સગણઃ પ્રિયયા સહ ॥ ૪૨॥

સ્વાત્મજં સ્વાઙ્કમારોપ્ય કુમારં સૂર્યવર્ચસમ્ ।
લાલયામાસ સુપ્રીત્યા શિવા ચ સ્નેહસઙ્કુલા ॥ ૪૩॥

હિમાલયસ્તદાગત્ય સ્વપુત્રૈઃ પરિવારિતઃ ।
સબન્ધુઃસાનુગઃ શમ્ભું તુષ્ટાવ ચ શિવાં ગુહમ્ ॥ ૪૪॥

તતો દેવગણાઃ સર્વે મુનયઃ સિદ્ધચારણાઃ ।
તુષ્ટુવુઃ શાઙ્કરિં શમ્ભું ગિરિજાં તુષિતાં ભૃશમ્ ॥ ૪૫॥

પુષ્પવૃષ્ટિં સુમહતીં ચક્રુશ્ચોપસુરાસ્તદા ।
જગુર્ગન્ધર્વપતયો નનૃતુશ્ચાપ્સરોગણાઃ ॥ ૪૬॥

વાદિત્રાણિ તથા નેદુસ્તદાનીં ચ વિશેષતઃ ।
જયશબ્દો નમઃ શબ્દો બભૂવોચ્ચૈર્મુહુર્મુહુઃ ॥ ૪૭॥

તતો મયાચ્યુતશ્ચાપિ સન્તુષ્ટોઽભૂદ્વિશેષતઃ ।
શિવં શિવાં કુમારં ચ સન્તુષ્ટાવ સમાદરાત્ ॥ ૪૮॥

કુમારમગ્રતઃ કૃત્વા હરિકેન્દ્રમુખાઃ સુરાઃ ।
ચક્રુર્નીરાજનં પ્રીત્યા મુનયશ્ચાપરે તથા ॥ ૪૯॥

ગીતવાદિત્રઘોષેણ બ્રહ્મઘોષેણ ભૂયસા ।

તદોત્સવો મહાનાસીત્કીર્તનં ચ વિશેષતઃ ॥ ૫૦॥

ગીતવાદ્યૈઃ સુપ્રસન્નૈસ્તથા સાઞ્જલિભિર્મુને ।
સ્તૂયમાનો જગન્નાથઃ સર્વૈર્દેવગણૈરભૂત્ ॥ ૫૧॥

તતઃસ ભગવાન્ રુદ્રો ભવાન્યા જગદમ્બયા ।
સર્વૈઃ સ્તુતો જગામાથ સ્વગિરિં સ્વગણૈર્વૃતઃ ॥ ૫૨॥

ઇતિ શ્રી શિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે તારકાતારકાસુરવધદેવોત્સવવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૨.૪.૧૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૧૧. એકાદશોઽધ્યાયઃ । બાણપ્રલમ્બવધપૂર્વક કુમારવિજયવર્ણનં લિઙ્ગસ્થાપનઞ્ચ ।

બ્રહ્મોવાચ
એતસ્મિન્નન્તરે તત્ર ક્રૌઞ્ચનામાચલો મુને ।
આજગામ કુમારસ્ય શરણં બાણપીડિતઃ ॥ ૧॥

પલાયમાનો યો યુદ્ધાદસોઢા તેજ ઐશ્વરમ્ ।
તુતોદાતીવ સ ક્રૌઞ્ચં કોટ્યાયુતબલાન્વિતઃ ॥ ૨॥

પ્રણિપત્ય કુમારસ્ય સ ભક્ત્યા ચરણામ્બુજમ્ ।
પ્રેમનિર્ભરયા વાચા તુષ્ટાવ ગુહમાદરાત્ ॥ ૩॥

ક્રૌઞ્ચ ઉવાચ
કુમાર સ્કન્દ દેવેશ તારકાસુરનાશક ।
પાહિ માં શરણાપન્નં બાણાસુરનિપીડિતમ્ ॥ ૪॥

સઙ્ગરાત્તે મહાસેન સમુચ્છિન્નઃ પલાયિતઃ ।
ન્યપીડયચ્ચ માઽઽગત્ય હા નાથ કરુણાકર ॥ ૫॥

તત્પીડિતસ્તે શરણમાગતોઽહં સુદુઃખિતઃ ।
પલાયમાનો દેવેશ શરજન્મન્ દયાં કુરુ ॥ ૬॥

દૈત્યં તં નાશય વિભો બાણાહ્વ માં સુખીકુરુ ।
દૈત્યઘ્નસ્ત્વં વિશેષેણ દેવાવનકરઃ સ્વરાટ્ ॥ ૭॥

બ્રહ્મોવાચ
ઇતિ ક્રૌઞ્ચસ્તુતઃસ્કન્દઃ પ્રસન્નો ભક્તપાલકઃ ।
ગૃહીત્વા શક્તિમતુલાં સ્વાં સસ્માર શિવો ધિયા ॥ ૮॥

ચિક્ષેપ તાં સમુદ્દિશ્ય સ બાણં શઙ્કરાત્મજઃ ।
મહાશબ્દો બભૂવાથ જજ્વલુશ્ચ દિશો નભઃ ॥ ૯॥

સબલં ભસ્મસાત્કૃત્વાસુરં તં ક્ષણમાત્રતઃ ।
ગુહોપકણ્ઠં શક્તિઃ સા જગામ પરમા મુને ॥ ૧૦॥

તતઃ કુમારઃ પ્રોવાચ ક્રૌઞ્ચં ગિરિવરં પ્રભુઃ ।
નિર્ભયઃ સ્વગૃહં ગચ્છ નષ્ટઃ સ સબલોઽસુરઃ ॥ ૧૧॥

તચ્છ્રુત્વા સ્વામિવચનં મુદિતો ગિરિરાટ્ તદા ।
સ્તુત્વા ગુહં તદારાતિં સ્વધામ પ્રત્યપદ્યત ॥ ૧૨॥

તતઃ સ્કન્દો મહેશસ્ય મુદા સ્થાપિતવાન્મુને ।
ત્રીણિ લિઙ્ગાનિ તત્રૈવ પાપઘ્નાનિ વિધાનતઃ ॥ ૧૩॥

પ્રતિજ્ઞેશ્વરનામાદૌ કપાલેશ્વરમાદરાત્ ।
કુમારેશ્વરમેવાથ સર્વસિદ્ધિપ્રદં ત્રયમ્ ॥ ૧૪॥

પુનઃસર્વેશ્વરસ્તત્ર જયસ્તમ્ભસમીપતઃ ।
સ્તમ્ભેશ્વરાભિધં લિઙ્ગં ગુહઃ સ્થાપિતવાન્મુદા ॥ ૧૫॥

તતઃ સર્વે સુરાસ્તત્ર વિષ્ણુપ્રભૃતયો મુદા ।
લિઙ્ગં સ્થાપિતવન્તસ્તે દેવદેવસ્ય શૂલિનઃ ॥ ૧૬॥

સર્વેષાં શિવલિઙ્ગાનાં મહિમાભૂત્તદાદ્ભુતઃ ।
સર્વકામપ્રદશ્ચાપિ મુક્તિદો ભક્તિકારિણામ્ ॥ ૧૭॥

તતઃ સર્વે સુરા વિષ્ણુપ્રમુખાઃ પ્રીતમાનસાઃ ।
ઐચ્છન્ગિરિવરં ગન્તું પુરસ્કૃત્ય ગુહં મુદા ॥ ૧૮॥

તસ્મિન્નવસરે શેષપુત્રઃ કુમુદનામકઃ ।
આજગામ કુમારસ્ય શરણં દૈત્યપીડિતઃ ॥ ૧૯॥

પ્રલમ્બાખ્યોઽસુરો યો હિ રણાદસ્માત્પલાયિતઃ ।

સ તત્રોપદ્રવં ચક્રે પ્રબલસ્તારકાનુગઃ ॥ ૨૦॥

સોઽથ શેષસ્ય તનયઃ કુમુદોઽહિપતેર્મહાન્ ।
કુમારશરણં પ્રાપ્તસ્તુષ્ટાવ ગિરિજાત્મજમ્ ॥ ૨૧॥

કુમુદ ઉવાચ
દેવદેવ મહાદેવ વરતાત મહાપ્રભો ।
પીડિતોઽહં પ્રલમ્બેન ત્વાઽહં શરણમાગતઃ ॥ ૨૨॥

પાહિ માં શરણાપન્નં પ્રલમ્બાસુરપીડિતમ્ ।
કુમાર સ્કન્દ દેવેશ તારકારે મહાપ્રભો ॥ ૨૩॥

ત્વં દીનબન્ધુઃ કરુણાસિન્ધુરાનતવત્સલઃ ।
ખલનિગ્રહકર્તા હિ શરણ્યશ્ચ સતાં ગતિઃ ॥ ૨૪॥

કુમુદેનસ્તુતશ્ચેત્થં વિજ્ઞપ્તસ્તદ્વધાય હિ ।
સ્વાશ્ચ શક્તિં સ જગ્રાહ સ્મૃત્વા શિવપદામ્બુજૌ ॥ ૨૫॥

ચિક્ષેપ તાં સમુદ્દિશ્ય પ્રલમ્બં ગિરિજાસુતઃ ।
મહાશબ્દો બભૂવાથ જજ્વલુશ્ચ દિશો નભઃ ॥ ૨૬॥

તં સાયુતબલં શક્તિર્દ્રુતં કૃત્વા ચ ભસ્મસાત્ ।
ગુહોપકણ્ઠં સહસાજગામાક્લિષ્ટકારિણી ॥ ૨૭॥

તતઃ કુમારઃ પ્રોવાચ કુમુદં નાગબાલકમ્ ।
નિર્ભયઃ સ્વગૃહં ગચ્છ નષ્ટઃ સ સબલોઽસુરઃ ॥ ૨૮॥

તચ્છ્રુત્વા ગુહવાક્યં સ કુમુદોઽહિપતેઃ સુતઃ ।
સ્તુત્વા કુમારં નત્વા ચ પાતાલં મુદિતો યયૌ ॥ ૨૯॥

એવં કુમારવિજયં વર્ણિતં તે મુનીશ્વર ।
ચરિતં તારકવધં પરમાશ્ચર્યકારકમ્ ॥ ૩૦॥

સર્વપાપહરં દિવ્યં સર્વકામપ્રદં નૃણામ્ ।
ધન્યં યશસ્યમાયુષ્યં ભુક્તિમુક્તિપ્રદં સતામ્ ॥ ૩૧॥

યે કીર્તયન્તિ સુયશોઽમિતભાગ્યયુતા નરાઃ ।
કુમારચરિતં દિવ્યં શિવલોકં પ્રયાન્તિ તે ॥ ૩૨॥

શ્રોષ્યન્તિ યે ચ તત્કીર્તિં ભક્ત્યા શ્રદ્ધાન્વિતા જનાઃ ।
મુક્તિં પ્રાપ્સ્યન્તિ તે દિવ્યામિહ ભુક્ત્વા પરં સુખમ્ ॥ ૩૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે બાણપ્રલમ્બવધ કુમારવિજયવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૨.૪.૧૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૧૨. દ્વાદશોઽધ્યાયઃ । તારકવધાનન્તરં દેવૈઃ કૃતાસ્તુતિઃ ।

બ્રહ્મોવાચ
નિહતં તારકં દૃષ્ટ્વા દેવા વિષ્ણુપુરોગમાઃ ।
તુષ્ટુવુઃ શાઙ્કરિં ભક્ત્યા સર્વેઽન્યે મુદિતાનનાઃ ॥ ૧॥

દેવા ઊચુઃ ।
નમઃ કલ્યાણરૂપાય નમસ્તે વિશ્વમઙ્ગલ ।
વિશ્વબન્ધો નમસ્તેઽસ્તુ નમસ્તે વિશ્વભાવન ॥ ૨॥

નમોસ્તુ તે દાનવવર્યહન્ત્રે
બાણાસુરપ્રાણહરાય દેવ ।
પ્રલમ્બનાશાય પવિત્રરૂપિણે
નમોનમઃ શઙ્કરતાત તુભ્યમ્ ॥ ૩॥

ત્વમેવ કર્ત્તા જગતાં ચ ભર્ત્તા
ત્વમેવ હર્ત્તા શુચિજ પ્રસીદ ।
પ્રપઞ્ચભૂતસ્તવ લોકબિમ્બઃ
પ્રસીદ શમ્ભ્વાત્મજ દીનબન્ધો ॥ ૪॥

દેવરક્ષાકર સ્વામિન્ રક્ષ નઃ સર્વદા પ્રભો ।
દેવપ્રાણાવનકર પ્રસીદ કરુણાકર ॥ ૫॥

હત્વા ત્વં તારકં દૈત્યં પરિવારયુતં વિભો ।
મોચિતાઃ સકલા દેવા વિપદ્ભ્યઃ પરમેશ્વર ॥ ૬॥

બ્રહ્મોવાચ
એવં સ્તુતઃ કુમારોઽસૌ દેવૈર્વિષ્ણુમુખૈઃ પ્રભુઃ ।

વરાન્દદાવભિનવાન્સર્વેભ્યઃ ક્રમશો મુને ॥ ૭॥

શૈલાન્નિરીક્ષ્ય સ્તુવતસ્તતઃસ ગિરિશાત્મજઃ ।
સુપ્રસન્નતરો ભૂત્વા પ્રોવાચ પ્રદદદ્વરાન્ ॥ ૮॥

સ્કન્દ ઉવાચ
યૂયં સર્વે પર્વતા હિ પૂજનીયાસ્તપસ્વિભિઃ ।
કર્મિભિર્જ્ઞાનિભિશ્ચૈવ સેવ્યમાના ભવિષ્યથ ॥ ૯॥

શમ્ભોર્વિશિષ્ટરૂપાણિ લિઙ્ગરૂપાણિ ચૈવ હિ ।
ભવિષ્યથ ન સન્દેહઃ પર્વતા વચનાન્મમ ॥ ૧૦॥

યોઽયં માતામહો મેઽદ્ય હિમવાન્પર્વતોત્તમઃ ।
તપસ્વિનાં મહાભાગઃ ફલદો હિ ભવિષ્યતિ ॥ ૧૧॥

દેવા ઊચુઃ ।
એવં દત્ત્વા વરાન્ હત્વા તારકં ચાસુરાધિપમ્ ।
ત્વયા કૃતાશ્ચ સુખિનો વયં સર્વે ચરાચરાઃ ॥ ૧૨॥

ઇદાનીં ખલુ સુપ્રીત્યા કૈલાસં ગિરિશાલયમ્ ।
જનની જનકૌ દ્રષ્ટું શિવાશમ્ભૂ ત્વમર્હસિ ॥ ૧૩॥

બ્રહ્મોવાચ
ઇત્યુક્ત્વા નિખિલા દેવા વિષ્ણ્વાદ્યાઃ પ્રાપ્તશાસનાઃ ।
કૃત્વા મહોત્સવં ભૂરિ સકુમારા યયુર્ગિરિમ્ ॥ ૧૪॥

કુમારે ગચ્છતિ વિભૌ કૈલાસં શઙ્કરાલયમ્ ।
મહામઙ્ગલમુત્તસ્થૌ જયશબ્દો બભૂવ હ ॥ ૧૫॥

આરુરોહ કુમારોઽસૌ વિમાનં પરમર્દ્ધિમત્ ।
સર્વતોલઙ્કૃતં રમ્યં સર્વોપરિ વિરાજિતમ્ ॥ ૧૬॥

અહં વિષ્ણુશ્ચ સમુદૌ તદા ચામરધારિણૌ ।
ગુહ મૂર્ધ્નિ મહાપ્રીત્યા મુનેઽભૂવં હ્યતન્દ્રિતૌ ॥ ૧૭॥

ઇન્દ્રાદ્યા અમરાઃ સર્વે કુર્વન્તો ગુહસેવનમ્ ।
યથોચિતં ચતુર્દિક્ષુ જગ્મુશ્ચ પ્રમુદાસ્તદા ॥ ૧૮॥

શમ્ભોર્જયં પ્રભાષન્તઃ પ્રાપુસ્તે શમ્ભુપર્વતમ્ ।
સાનન્દા વિવિશુસ્તત્રોચ્ચરિતો મઙ્ગલધ્વનિઃ ॥ ૧૯॥

દૃષ્ટ્વા શિવં શિવાં ચૈવ સર્વે વિષ્ણ્વાદયો દ્રુતમ્ ।
પ્રણમ્ય શઙ્કરં ભક્ત્યા કરૌ બદ્ધ્વા વિનમ્રકાઃ ॥ ૨૦॥

કુમારોઽપિ વિનીતાત્મા વિમાનાદવતીર્ય ચ ।
પ્રણનામ મુદા શમ્ભું શિવાં સિંહાસનસ્થિતામ્ ॥ ૨૧॥

અથ દૃષ્ટ્વા કુમારં તં તનયં પ્રાણવલ્લભમ્ ।
તૌ દમ્પતી શિવૌ દેવૌ મુમુદાતેઽતિ નારદ ॥ ૨૨॥

મહાપ્રભુઃસમુત્થાપ્ય તમુત્સઙ્ગે ન્યવેશયત્ ।
મૂર્ધ્નિ જઘ્રૌ મુદા સ્નેહાત્તં પસ્પર્શ કરેણ હ ॥ ૨૩॥

મહાનન્દભરઃ શમ્ભુશ્ચકાર મુખચુમ્બનમ્ ।
કુમારસ્ય મહાસ્નેહાત્ તારકારેર્મહાપ્રભોઃ ॥ ૨૪॥

શિવાપિ તં સમુત્થાપ્ય સ્વોત્સઙ્ગે સંન્યવેશયત્ ।
કૃત્વા મૂર્ધ્નિ મહાસ્નેહાત્ તન્મુખાબ્જં ચુચુમ્બ હિ ॥ ૨૫॥

તયોસ્તદા મહામોદો વવૃધેઽતીવ નારદ ।
દમ્પત્યોઃ શિવયોસ્તાત ભવાચારં પ્રકુર્વતોઃ ॥ ૨૬॥

તદોત્સવો મહાનાસીન્નાનાશ્ચર્યઃ શિવાલયે ।
જયશબ્દો નમશ્શબ્દો બભૂવાતીવ સર્વતઃ ॥ ૨૭॥

તતઃસુરગણાઃ સર્વે વિષ્ણ્વાદ્યા મુનયસ્તથા ।
સુપ્રણમ્ય મુદા શમ્ભું તુષ્ટુવુઃ સશિવં મુને ॥ ૨૮॥

દેવા ઊચુઃ ।
દેવદેવ મહાદેવ ભક્તાનામભયપ્રદ ।
નમો નમસ્તે બહુશઃ કૃપાકર મહેશ્વર ॥ ૨૯॥

અદ્ભુતા તે મહાદેવ મહાલીલા સુખપ્રદા ।
સર્વેષાં શઙ્કર સતાં દીનબન્ધો મહાપ્રભો ॥ ૩૦॥

એવં મૂઢધિયશ્ચાજ્ઞાઃ પૂજાયાં તે સનાતનમ્ ।
આવાહનં ન જાનીમો ગતિં નૈવ પ્રભોદ્ભુતામ્ ॥ ૩૧॥

ગઙ્ગાસલિલધારાય હ્યાધારાય ગુણાત્મને ।
નમસ્તે ત્રિદશેશાય શઙ્કરાય નમોનમઃ ॥ ૩૨॥

વૃષાઙ્કાય મહેશાય ગણાનાં પતયે નમઃ ।

સર્વેશ્વરાય દેવાય ત્રિલોકપતયે નમઃ ॥ ૩૩॥

સંહર્ત્રે જગતાં નાથ સર્વેષાં તે નમો નમઃ ।
ભર્ત્રે કર્ત્રે ચ દેવેશ ત્રિગુણેશાય શાશ્વતે ॥ ૩૪॥

વિસઙ્ગાય પરેશાય શિવાય પરમાત્મને ।
નિષ્પ્રપઞ્ચાય શુદ્ધાય પરમાયાવ્યયાય ચ ॥ ૩૫॥

દણ્ડહસ્તાય કાલાય પાશહસ્તાય તે નમઃ ।
વેદમન્ત્રપ્રધાનાય શતજિહ્વાય તે નમઃ ॥ ૩૬॥

ભૂતં ભવ્યં ભવિષ્યં ચ સ્થાવરં જઙ્ગમં ચ યત્ ।
તવ દેહાત્સમુત્પન્નં સર્વથા પરમેશ્વર ॥ ૩૭॥

પાહિ નઃ સર્વદા સ્વામિન્પ્રસીદ ભગવન્પ્રભો ।
વયં તે શરણાપન્નાઃ સર્વથા પરમેશ્વર ॥ ૩૮॥

શિતિકણ્ઠાય રુદ્રાય સ્વાહાકારાય તે નમઃ ।
અરૂપાય સરૂપાય વિશ્વરૂપાય તે નમઃ ॥ ૩૯॥

શિવાય નીલકણ્ઠાય ચિતાભસ્માઙ્ગધારિણે ।
નિત્યં નીલશિખણ્ડાય શ્રીકણ્ઠાય નમોનમઃ ॥ ૪૦॥

સર્વપ્રણતદેહાય સંયમપ્રણતાય ચ ।
મહાદેવાય શર્વાય સર્વાર્ચિતપદાય ચ ॥ ૪૧॥

ત્વં બ્રહ્મા સર્વદેવાનાં રુદ્રાણાં નીલલોહિતઃ ।
આત્મા ચ સર્વભૂતાનાં સાઙ્ખ્યૈઃ પુરુષ ઉચ્યસે ॥ ૪૨॥

પર્વતાનાં સુમેરુસ્ત્વં નક્ષત્રાણાં ચ ચન્દ્રમાઃ ।
ઋષીણાં ચ વસિષ્ઠસ્ત્વં દેવાનાં વાસવસ્તથા ॥ ૪૩॥

ૐઙ્કારસ્સર્વવેદાનાં ત્રાતા ભવ મહેશ્વર ।
ત્વં ચ લોકહિતાર્થાય ભૂતાનિ પરિષિઞ્ચસિ ॥ ૪૪॥

મહેશ્વર મહાભાગ શુભાશુભનિરીક્ષક ।
આપ્યાયાસ્માન્હિ દેવેશ કર્તૄન્વૈ વચનં તવ ॥ ૪૫॥

રૂપકોટિસહસ્રેષુ રૂપકોટિશતેષુ તે ।
અન્તં ગન્તું ન શક્તાઃ સ્મ દેવદેવ નમોઽસ્તુ તે ॥ ૪૬॥

બ્રહ્મોવાચ

ઇતિ સ્તુત્વાઽખિલા દેવા વિષ્ણવાદ્યાઃપ્રમુખસ્થિતાઃ ।
મુહુર્મુહુસ્સુપ્રણમ્ય સ્કન્દં કૃત્વા પુરસ્સરમ્ ॥ ૪૭॥

દેવસ્તુતિં સમાકર્ણ્ય શિવઃસર્વેશ્વરઃ સ્વરાટ્ ।
સુપ્રસન્નો બભૂવાથ વિજહાસ દયાપરઃ ॥ ૪૮॥

ઉવાચ સુપ્રસન્નાત્મા વિષ્ણવાદીન્સુરસત્તમાન્ ।
શઙ્કરઃ પરમેશાનો દીનબન્ધુઃસતાં ગતિઃ ॥ ૪૯॥

શિવ ઉવાચ

હે હરે હે વિધે દેવા વાક્યં મે શ‍ૃણુતાદરાત્ ।
સર્વથાઽહં સતાં ત્રાતા દેવાનાં વઃ કૃપાનિધિઃ ॥ ૫૦॥

દુષ્ટહન્તા ત્રિલોકેશઃ શઙ્કરો ભક્તવત્સલઃ ।
કર્તા ભર્તા ચ હર્તા ચ સર્વેષાં નિર્વિકારવાન્ ॥ ૫૧॥

યદા યદા ભવેદ્દુઃખં યુષ્માકં દેવસત્તમાઃ ।
તદા તદા માં યૂયં વૈ ભજન્તુ સુખહેતવે ॥ ૫૨॥

બ્રહ્મોવાચ

ઇત્યાજ્ઞપ્તાસ્તદા દેવા વિષ્ણવાદ્યાઃ સમુનીશ્વરાઃ ।
શિવાં પ્રણમ્ય સશિવં કુમારં ચ મુદાન્વિતાઃ ॥ ૫૩॥

કથયન્તો યશો રમ્યં શિવયોઃ શાઙ્કરેશ્ચ તત્ ।
આનન્દં પરમં પ્રાપ્ય સ્વધામાનિ યયુર્મુને ॥ ૫૪॥

શિવોઽપિ શિવયા સાર્દ્ધં સગણઃ પરમેશ્વરઃ ।
કુમારેણયુતઃ પ્રીત્યોવાસ તસ્મિન્ગિરૌ મુદા ॥ ૫૫॥

ઇત્યેવં કથિતં સર્વં કૌમારં ચરિતં મુને ।
શૈવં ચ સુખદં દિવ્યં કિમન્યચ્છ્રોતુમિચ્છસિ ॥ ૫૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે સ્વામિકાર્તિકચરિતગર્ભિતશિવાશિવચરિતવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૨.૪.૧૨॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૧૩. ત્રયોદશોઽધ્યાયઃ । ગણેશોત્પત્તિઃ ।

સૂત ઉવાચ
તારકારેરિતિ શ્રુત્વા વૃત્તમદ્ભુતમુત્તમમ્ ।
નારદઃ સુપ્રસન્નોઽથ પપ્રચ્છ પ્રીતિતો વિધિમ્ ॥ ૧॥

નારદ ઉવાચ
દેવદેવ પ્રજાનાથ શિવજ્ઞાનનિધે મયા ।
શ્રુતં કાર્તિકસદ્વૃત્તમમૃતાદપિ ચોત્તમમ્ ॥ ૨॥

અધુના શ્રોતુમિચ્છામિ ગાણેશં વૃત્તમુત્તમમ્ ।
તજ્જન્મચરિતં દિવ્યં સર્વમઙ્ગલમઙ્ગલમ્ ॥ ૩॥

સૂત ઉવાચ
ઇત્યાકર્ણ્ય વચસ્તસ્ય નારદસ્ય મહામુનેઃ ।
પ્રસન્નમાનસો બ્રહ્મા પ્રત્યુવાચ શિવં સ્મરન્ ॥ ૪॥

બ્રહ્મોવાચ
કલ્પભેદાદ્ગણેશસ્ય જનિઃ પ્રોક્તા વિધેઃ પરાત્ ।
શનિદૃષ્ટં શિરશ્છિન્નં સઞ્ચિતં ગાજમાનનમ્ ॥ ૫॥

ઇદાનીં શ્વેતકલ્પોક્તા ગણેશોત્પત્તિરુચ્યતે ।
યત્ર ચ્છિન્નં શિરસ્તસ્ય શિવેન ચ કૃપાલુના ॥ ૬॥

સન્દેહો નાત્ર કર્તવ્યઃ શઙ્કરસ્સૂતિકૃન્મુને ।
સ હિ સર્વાધિપઃ શમ્ભુર્નિર્ગુણઃ સગુણોઽપિ હિ ॥ ૭॥

તલ્લીલયાખિલં વિશ્વં સૃજ્યતે પાલ્યતે તથા ।
વિનાશ્યતે મુનિશ્રેષ્ઠ પ્રસ્તુતં શ ૃણુ ચાદરાત્ ॥ ૮॥

ઉદ્વાહિતે શિવે ચાત્ર કૈલાસં ચ ગતે સતિ ।
કિયતા ચૈવ કાલેન જાતો ગણપતેર્ભવઃ ॥ ૯॥

એકસ્મિન્નેવ કાલે ચ જયા ચ વિજયા સખી ।
પાર્વત્યા ચ મિલિત્વા વૈ વિચારે તત્પરાભવત્ ॥ ૧૦॥

રુદ્રસ્ય ચ ગણાઃસર્વે શિવસ્યાજ્ઞાપરાયણાઃ ।

તે સર્વેઽપ્યસ્મદીયાશ્ચ નન્દિભૃઙ્ગિપુરસ્સરાઃ ॥ ૧૧॥

પ્રમથાસ્તે હ્યસઙ્ખ્યાતા અસ્મદીયો ન કશ્ચન ।
દ્વારિ તિષ્ઠન્તિ તે સર્વે શઙ્કરાજ્ઞાપરાયણાઃ ॥ ૧૨॥

તે સર્વેપ્યસ્મદીયાંશ્ચ તથાપિ ન મિલેન્મનઃ ।
એકશ્ચૈવાસ્મદીયો હિ રચનીયસ્ત્વયાનઘે ॥ ૧૩॥

બ્રહ્મોવાચ
ઇત્યુક્ત્વા પાર્વતી દેવી સખીભ્યાં સુન્દરં વચઃ ।
હિતં મેને તદા તચ્ચ કર્તું સ્માપ્યધ્યવસ્યતિ ॥ ૧૪॥

તતઃ કદાચિન્મજ્જત્યાં પાર્વત્યાં વૈ સદાશિવઃ ।
નન્દિનં પરિભત્સ્ર્યાથ હ્યાજગામ ગૃહાન્તરમ્ ॥ ૧૫॥

આયાન્તં શઙ્કરં દૃષ્ટ્વાઽસમયે જગદમ્બિકા ।
ઉત્તસ્થૌ મજ્જતી સા વૈ લજ્જિતા સુન્દરી તદા ॥ ૧૬॥

તસ્મિન્નવસરે દેવી કૌતુકેનાતિસંયુતા ।
તદીયં તદ્વચશ્ચૈવ હિતં મેને સુખાવહમ્ ॥ ૧૭॥

એવં જાતે તદા કાલે કદાચિત્પાર્વતી શિવા ।
વિચિન્ત્ય મનસા ચેતિ પરમાયા પરેશ્વરી ॥ ૧૮॥

મદીયઃ સેવકઃ કશ્ચિદ્ભવેચ્છુભતરઃ કૃતી ।
મદાજ્ઞયા પરં નાન્યદ્રેખામાત્રં ચલેદિહ ॥ ૧૯॥

વિચાર્યેતિ ચ સા દેવી વપુષો મલસમ્ભવમ્ ।
પુરુષં નિર્મમૌ સા તુ સર્વલક્ષણસંયુતમ્ ॥ ૨૦॥

સર્વાવયવનિર્દોષં સર્વાવયવ સુન્દરમ્ ।
વિશાલં સર્વશોભાઢ્યં મહાબલપરાક્રમમ્ ॥ ૨૧॥

વસ્ત્રાણિ ચ તદા તસ્મૈ દત્ત્વા સા વિવિધાનિ હિ ।
નાનાલઙ્કરણં ચૈવ બહ્વાશિષમનુત્તમામ્ ॥ ૨૨॥

મત્પુત્રસ્ત્વં મદીયોઽસિ નાન્યઃ કશ્ચિદિહાસ્તિ મે ।
એવમુક્તઃ સ પુરુષો નમસ્કૃત્ય શિવાં જગૌ ॥ ૨૩॥

ગણેશ ઉવાચ
કિં કાર્યં વિદ્યતે તેઽદ્ય કરવાણિ તવોદિતમ્ ।

ઇત્યુક્તા સા તદા તેન પ્રત્યુવાચ સુતં શિવા ॥ ૨૪॥

શિવોવાચ
હે તાત શૃણુ મદ્વાક્યં દ્વારપાલો ભવાદ્ય મે ।
મત્પુત્રસ્ત્વં મદીયોઽસિ નાન્યથા કશ્ચિદસ્તિ મે ॥ ૨૫॥

વિના મદાજ્ઞાં સત્પુત્ર નૈવાયાન્મદ્ગૃહાન્તરમ્ ।
કોઽપિ ક્વાપિ હઠાત્તાત સત્યમેતન્મયોદિતમ્ ॥ ૨૬॥

બ્રહ્મોવાચ
ઇત્યુક્ત્વા ચ દદૌ તસ્મૈ યષ્ટિં ચાતિદૃઢાં મુને ।
તદીયં રૂપમાલોક્ય સુન્દરં હર્ષમાગતા ॥ ૨૭॥

મુખમાચુમ્બ્ય સુપ્રીત્યાલિઙ્ગ્ય તં કૃપયા સુતમ્ ।
સ્વદ્વારિ સ્થાપયામાસ યષ્ટિપાણિં ગણાધિપમ્ ॥ ૨૮॥

અથ દેવીસુતસ્તાત ગૃહદ્વારિ સ્થિતો ગણઃ ।
યષ્ટિપાણિર્મહાવીરઃ પાર્વતીહિતકામ્યયા ॥ ૨૯॥

સ્વદ્વારિ સ્થાપયિત્વા તં ગણેશં સ્વસુતં શિવા ।
સ્વયં ચ મજ્જતી સા વૈ સંસ્થિતાસીત્સખીયુતા ॥ ૩૦॥

એતસ્મિન્નેવ કાલે તુ શિવો દ્વારિ સમાગતઃ ।
કૌતુકી મુનિર્શાદૂલ નાનાલીલાવિશારદઃ ॥ ૩૧॥

ઉવાચ ચ શિવેશં તમવિજ્ઞાય ગણાધિપઃ ।
માતુરાજ્ઞાં વિના દેવ ગમ્યતાં ન ત્વયાધુના ॥ ૩૨॥

મજ્જનાર્થં સ્થિતા માતા ક્વ યાસીતો વ્રજાધુના ।
ઇત્યુક્ત્વા યષ્ટિકાં તસ્ય રોધનાય તદાગ્રહીત્ ॥ ૩૩॥

તં દૃષ્ટ્વા તુ શિવઃ પ્રાહ કં નિષેધસિ મૂઢધીઃ ।
માં ન જાનાસ્યસદ્બુદ્ધે શિવોઽહમિતિ નાન્યથા ॥ ૩૪॥

તાડિતસ્તેન યષ્ટ્યા હિ ગણેશેન મહેશ્વરઃ ।
પ્રત્યુવાચ સ તં પુત્રં બહુલીલશ્ચ કોપિતઃ ॥ ૩૫॥

શિવ ઉવાચ
મુર્ખોઽસિ ત્વં ન જાનાસિ શિવોઽહં ગિરિજાપતિઃ ।
સ્વગૃહં યામિ રે બાલ નિષેધસિ કથં હિ મામ્ ॥ ૩૬॥

બ્રહ્મોવાચ
ઇત્યુક્ત્વા પ્રવિશન્તં તં મહેશં ગણનાયકઃ ।
ક્રોધં કૃત્વા તતો વિપ્ર દણ્ડેનાતાડયત્પુનઃ ॥ ૩૭॥

તતશ્શિવશ્ચ સઙ્ક્રુદ્ધો ગણાનાજ્ઞાપયન્નિજાન્ ।
કો વાઽયં વર્તતે કિં ચ ક્રિયતે પશ્યતાં ગણાઃ ॥ ૩૮॥

ઇત્યુક્ત્વા તુ શિવસ્તત્ર સ્થિતઃ ક્રુદ્ધો ગૃહાદ્બહિઃ ।
ભવાચારરતઃસ્વામી બહ્વદ્ભુતસુલીલકઃ ॥ ૩૯॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે ગણેશોત્પત્તિવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૨.૪.૧૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૧૪. ચતુર્દશોઽધ્યાયઃ । ગણેશેન સહ શિવગણાનાં વિવાદવર્ણનમ્ ।

બ્રહ્મોવાચ
ગણાસ્તે ક્રોધસમ્પન્નાસ્તત્ર ગત્વા શિવાજ્ઞયા ।
પપ્રચ્છુર્ગિરિજાપુત્રં તં તદા દ્વારપાલકમ્ ॥ ૧॥

શિવગણા ઊચુઃ
કોઽસિ ત્વં કુત આયાતઃ કિં વા ત્વં ચ ચિકીર્ષસિ ।
ઇતોઽદ્ય ગચ્છ દૂરં વૈ યદિ જીવિતુમિચ્છસિ ॥ ૨॥

બ્રહ્મોવાચ
તદીયં તદ્વચઃ શ્રુત્વા ગિરિજાતનયઃ સ વૈ ।
નિર્ભયો દણ્ડપાણિશ્ચ દ્વારપાનબ્રવીદિદમ્ ॥ ૩॥

ગણેશ ઉવાચ
યૂયં કે કુત આયાતા ભવન્તઃ સુન્દરા ઇમે ।
યાત દૂરં કિમર્થં વૈ સ્થિતા અત્ર વિરોધિનઃ ॥ ૪॥

બ્રહ્મોવાચ
એવં શ્રુત્વા વચસ્તસ્ય હાસ્યં કૃત્વા પરસ્પરમ્ ।

ઊચુઃસર્વે શિવગણા મહાવીરા ગતસ્મયાઃ ॥ ૫॥

પરસ્પરમિતિ પ્રોચ્ય સર્વે તે શિવપાર્ષદાઃ ।
દ્વારપાલં ગણેશં તં પ્રત્યૂચુઃ ક્રુદ્ધમાનસાઃ ॥ ૬॥

શિવગણા ઊચુઃ
શ્રૂયતાં દ્વારપાલા હિ વયં શિવગણા વરાઃ ।
ત્વાં નિવારયિતું પ્રાપ્તાઃ શઙ્કરસ્યાજ્ઞયા વિભોઃ ॥ ૭॥

ત્વામપીહ ગણં મત્વા ન હન્યામોઽન્યથા હતઃ ।
તિષ્ઠ દૂરે સ્વતઃ ત્વં ચ કિમર્થં મૃત્યુમીહસે ॥ ૮॥

બ્રહ્મોવાચ
ઇત્યુક્તોઽપિ ગણેશશ્ચ ગિરિજાતનયોઽભયઃ ।
નિર્ભર્ત્સ્ય શઙ્કરગણાન્ન દ્વારં મુક્તવાંસ્તદા ॥ ૯॥

તે સર્વેઽપિ ગણાઃ શૈવાઃ તત્રત્યા વચનં તદા ।
શ્રુત્વા તત્ર શિવં ગત્વા તદ્વૃત્તાન્તમથાબ્રુવન્ ॥ ૧૦॥

તતશ્ચ તદ્વચઃ શ્રુત્વાદ્ભુતલીલો મહેશ્વરઃ ।
વિનિર્ભર્ત્સ્ય ગણાનૂચે નિજાઁલ્લોકગતિર્મુને ॥ ૧૧॥

મહેશ્વર ઉવાચ
કશ્ચાયં વર્તતે કિં ચ બ્રવીત્યરિવદુચ્છ્રિતઃ ।
કિં કરિષ્યત્યસદ્બુદ્ધિઃ સ્વમૃત્યું વાઞ્છતિ ધ્રુવમ્ ॥ ૧૨॥

દૂરતઃ ક્રિયતાં હ્યેષ દ્વારપાલો નવીનકઃ ।
ક્લીબા ઇવ સ્થિતાસ્તસ્ય વૃત્તં વદથ મે કથમ્ ॥ ૧૩॥

સ્વામિનોક્તા ગણાસ્તે ચાદ્ભુતલીલેન શમ્ભુના ।
પુનરાગત્ય તત્રૈવ તમૂચુર્દ્વારપાલકમ્ ॥ ૧૪॥

શિવગણા ઊચુઃ ।
રે રે દ્વારપ કસ્ત્વં હિ સ્થિતશ્ચ સ્થાપિતઃ કુતઃ ।
નૈવાસ્માન્ગણયસ્યેવં કથં જીવિતુમિચ્છસિ ॥ ૧૫॥

દ્વારપાલા વયં સર્વે સ્થિતાઃ કિં પરિભાષસે ।
સિંહાસનગૃહીતશ્ચ શ઼ૃગાલઃ શિવમીહતે ॥ ૧૬॥

તાવદ્ગર્જસિ મૂર્ખ ત્વં યાવદ્ગણપરાક્રમઃ ।

નાનુભૂતસ્ત્વયાત્રૈવ હ્યનુભૂતઃ પતિષ્યસિ ॥ ૧૭॥

ઇત્યુક્તસ્તૈસ્સુસઙ્ક્રુદ્ધો હસ્તાભ્યાં યષ્ટિકાં તદા ।
ગૃહીત્વા તાડયામાસ ગણાંસ્તાન્પરિભાષિણઃ ॥ ૧૮॥

ઉવાચાથ શિવાપુત્રઃ પરિભર્ત્સ્ય ગણેશ્વરાન્ ।
શઙ્કરસ્ય મહાવીરાન્નિર્ભયસ્તાન્ગણેશ્વરઃ ॥ ૧૯॥

શિવાપુત્ર ઉવાચ
યાત યાત ઇતો દૂરે નો ચેદ્વો દર્શયામિ હ ।
સ્વપરાક્રમમત્યુગ્રં યાસ્યથાત્યુપહાસ્યતામ્ ॥ ૨૦॥

ઇત્યાકર્ણ્ય વચસ્તસ્ય ગિરિજાતનયસ્ય હિ ।
પરસ્પરમથોચુસ્તે શઙ્કરસ્ય ગણાસ્તદા ॥ ૨૧॥

શિવગણા ઊચુઃ ।
કિં કર્તવ્યં ક્વ ગન્તવ્યં ક્રિયતે સ ન કિં પુનઃ ।
મર્યાદા રક્ષ્યતેઽસ્માભિરન્યથા કિં બ્રવીતિ ચ ॥ ૨૨॥

બ્રહ્મોવાચ
તતઃ શમ્ભુગણાઃસર્વે શિવં દૂરે વ્યવસ્થિતમ્ ।
ક્રોશમાત્રં તુ કૈલાસાદ્ગત્વા તે ચ તથાઽબ્રુવન્ ॥ ૨૩॥

શિવો વિહસ્ય તાન્સર્વાંસ્ત્રિશૂલકર ઉગ્રધીઃ ।
ઉવાચ પરમેશો હિ સ્વગણાન્ વીરસમ્મતાન્ ॥ ૨૪॥

શિવ ઉવાચ
રે રે ગણાઃ ક્લીબમતા ન વીરા વીરમાનિનઃ ।
મદગ્રે નોદિતું યોગ્યા ભર્ત્સિતઃ કિં પુનર્વદેત્ ॥ ૨૫॥

ગમ્યતાં તાડ્યતાં ચૈષ યઃ કશ્ચિત્પ્રભવેદિહ ।
બહુનોક્તેન કિં ચાત્ર દૂરીકર્તવ્ય એવ સઃ ॥ ૨૬॥

બ્રહ્મોવાચ
ઇતિ સર્વે મહેશેન જગ્મુસ્તત્ર મુનીશ્વર ।
ભર્ત્સિતાસ્તેન દેવેન પ્રોચુશ્ચ ગણસત્તમાઃ ॥ ૨૭॥

શિવગણા ઊચુઃ ।
રેરે ત્વં શ ૃણુ વૈ બાલ બલાત્કિં પરિભાષસે ।

ઇતસ્ત્વં દૂરતો યાહિ નો ચેન્મૃત્યુર્ભવિષ્યતિ ॥ ૨૮॥

બ્રહ્મોવાચ
ઇતિ શ્રુત્વા વચસ્તેષાં શિવાજ્ઞાકારિણાં ધ્રુવમ્ ।
શિવાસુતસ્તદાભૂત્સ કિં કરોમીતિ દુઃખિતઃ ॥ ૨૯॥

એતસ્મિન્નન્તરે દેવી તેષાં તસ્ય ચ વૈ પુનઃ ।
શ્રુત્વા તુ કલહં દ્વારિ સખીં પશ્યેતિ સાબ્રવીત્ ॥ ૩૦॥

સમાગત્ય સખી તત્ર વૃત્તાન્તં સમબુધ્યત ।
ક્ષણમાત્રં તદા દૃષ્ટ્વા ગતા હૃષ્ટા શિવાન્તિકમ્ ॥ ૩૧॥

તત્ર ગત્વા તુ તત્સર્વં વૃત્તં તદ્યદભૂન્મુને ।
અશેષેણ તયા સખ્યા કથિતં ગિરિજાગ્રતઃ ॥ ૩૨॥

સખ્યુવાચ
અસ્મદીયો ગણો યો હિ સ્થિતો દ્વારિ મહેશ્વરિ ।
નિર્ભર્ત્સયન્તિ તં વીરાઃ શઙ્કરસ્ય ગણા ધ્રુવમ્ ॥ ૩૩॥

શિવશ્ચૈવ ગણાઃ સર્વે વિના તેઽવસરં કથમ્ ।
પ્રવિશન્તિ હઠાદ્ગેહે નૈતચ્છુભતરં તવ ॥ ૩૪॥

સમ્યક્ કૃતં હ્યનેનૈવ ન હિ કોઽપિ પ્રવેશિતઃ ।
દુઃખં ચૈવાનુભૂયાત્ર તિરસ્કારાદિકં તથા ॥ ૩૫॥

અતઃ પરન્તુ વાગ્વાદઃ ક્રિયતે ચ પરસ્પરમ્ ।
વાગ્વાદે ચ કૃતે નૈવ તર્હ્યાયાન્તુ સુખેન વૈ ॥ ૩૬॥

કૃતશ્ચૈવાત્ર વાગ્વાદસ્તં જિત્વા વિજયેન ચ ।
પ્રવિશન્તુ તથા સર્વે નાન્યથા કર્હિચિત્પ્રિયે ॥ ૩૭॥

અસ્મિન્નેવાસ્મદીયે વૈ સર્વે સમ્ભર્ત્સિતા વયમ્ ।
તસ્માદ્દેવિ ત્વયા ભદ્રે ન ત્યાજ્યો માન ઉત્તમઃ ॥ ૩૮॥

શિવો મર્કટવત્તેઽદ્ય વર્તતે સર્વદા સતિ ।
કિં કરિષ્યત્યહઙ્કારમાનુકૂલ્યં ભવિષ્યતિ ॥ ૩૯॥

બ્રહ્મોવાચ
અહો ક્ષણં સ્થિતા તત્ર શિવેચ્છા વશતઃસતી । ૪૦॥

મનસ્યુવાચ સા ભૂત્વા માનિની પાર્વતી તદા । ૪૧॥

શિવોવાચ
અહો ક્ષણં સ્થિતો નૈવ હઠાત્કારઃ કથં કૃતઃ ।
કથં ચૈવાત્ર કર્ત્તવ્યં વિનયેનાથ વા પુનઃ ॥ ૪૨॥

ભવિષ્યતિ ભવત્યેવ કૃતં નૈવાન્યથા પુનઃ ।
ઇત્યુક્ત્વા તુ સખી તત્ર પ્રેષિતા પ્રિયયા તદા ॥ ૪૩॥

સમાગત્યાઽબ્રવીત્સા ચ પ્રિયયા કથિતં હિ યત્ ।
સમાચષ્ટ ગણેશં તં ગિરિજાતનયં તદા ॥ ૪૪॥

સખ્યુવાચ
સમ્યક્કૃતં ત્વયા ભદ્ર બલાત્તે પ્રવિશન્તુ ન ।
ભવદગ્રે ગણા હ્યેતે કિં જયન્તુ ભવાદૃશમ્ ॥ ૪૫॥

કૃતં ચેદ્વાકૃતં ચૈવ કર્ત્તવ્યં ક્રિયતાં ત્વયા ।
જિતો યસ્તુ પુનર્વાપિ ન વૈરમથ વા ધ્રુવમ્ ॥ ૪૬॥

બ્રહ્મોવાચ
ઇતિ શ્રુત્વા વચસ્તસ્યા માતુશ્ચૈવ ગણેશ્વરઃ ।
આનન્દં પરમં પ્રાપ બલં ભૂરિ મહોન્નતિમ્ ॥ ૪૭॥

બદ્ધકક્ષસ્તથોષ્ણીષં બદ્ધ્વા જઙ્ઘોરુ સંસ્પૃશન્ ।
ઉવાચ તાન્ ગણાન્ સર્વાન્ નિર્ભયં વચનં મુદા ॥ ૪૮॥

ગણેશ ઉવાચ
અહં ચ ગિરિજાસૂનુર્યૂયં શિવગણાસ્તથા ।
ઉભયે સમતાં પ્રાપ્તાઃ કર્તવ્યં ક્રિયતાં પુનઃ ॥ ૪૯॥

ભવન્તો દ્વારપાલાશ્ચ દ્વારપોઽહં કથં ન હિ ।
ભવન્તશ્ચ સ્થિતાસ્તત્રાઽહં સ્થિતોઽત્રેતિ નિશ્ચિતમ્ ॥ ૫૦॥

ભવદ્ભિશ્ચ સ્થિતં હ્યત્ર યદા ભવતિ નિશ્ચિતમ્ ।
તદા ભવદ્ભિઃ કર્ત્તવ્યં શિવાજ્ઞાપરિપાલનમ્ ॥ ૫૧॥

ઇદાનીં તુ મયા ચાત્ર શિવાજ્ઞાપરિપાલનમ્ ।
સત્યં ચ ક્રિયતે વીરા નિર્ણીતં મે યથોચિતમ્ ॥ ૫૨॥

તસ્માચ્છિવગણાઃસર્વે વચનં શૃણુતાદરાત્ ।

હઠાદ્વા વિનયાદ્વા ન ગન્તવ્યં મન્દિરે પુનઃ ॥ ૫૩॥

બ્રહ્મોવાચ
ઇત્યુક્તાસ્તે ગણેનૈવ સર્વે તે લજ્જિતા ગણાઃ ।
યયુઃ શિવાન્તિકં તં વૈ નમસ્કૃત્ય પુરઃ સ્થિતાઃ ॥ ૫૪॥

સ્થિત્વા ન્યવેદયન્સર્વે વૃત્તાન્તં ચ તદદ્ભુતમ્ ।
કરૌ બદ્ધ્વા નતસ્કન્ધાઃ શિવં સ્તુત્વા પુરઃ સ્થિતાઃ ॥ ૫૫॥

તત્સર્વં તુ તદા શ્રુત્વા વૃત્તં તત્સ્વગણોદિતમ્ ।
લૌકિકીં વૃત્તિમાશ્રિત્ય શઙ્કરો વાક્યમબ્રવીત્ ॥ ૫૬॥

શઙ્કર ઉવાચ
શ્રૂયતાં ચ ગણાઃસર્વે યુદ્ધં યોગ્યં ભવેન્ન હિ ।
યૂયં ચાત્રાસ્મદીયા વૈ સ ચ ગૌરીગણસ્તથા ॥ ૫૭॥

વિનયઃ ક્રિયતે ચેદ્વૈ વશ્યઃ શમ્ભુઃ સ્ત્રિયા સદા ।
ઇતિ ખ્યાતિર્ભવેલ્લોકે ગર્હિતા મે ગણા ધ્રુવમ્ ॥ ૫૮॥

કૃતે ચૈવાત્ર કર્તવ્યમિતિ નીતિર્ગરીયસી ।
એકાકી સ ગણો બાલઃ કિં કરિષ્યતિ વિક્રમમ્ ॥ ૫૯॥

ભવન્તશ્ચ ગણા લોકે યુદ્ધે ચાતિ વિશારદાઃ ।
મદીયાશ્ચ કથં યુદ્ધં હિત્વા યાસ્યથ લાઘવમ્ ॥ ૬૦॥

સ્ત્રિયાઽઽગ્રહઃ કથં કાર્યો પત્યુરગ્રે વિશેષતઃ ।
કૃત્વા સા ગિરિજા તસ્ય નૂનં ફલમવાપ્સ્યતિ ॥ ૬૧॥

તસ્માત્સર્વે ચ મદ્વીરાઃ શ ૃણુતાદરતો વચઃ ।
કર્ત્તવ્યં સર્વથા યુદ્ધં ભાવિ યત્તદ્ભવત્વિતિ ॥ ૬૨॥

બ્રહ્મોવાચ
ઇત્યુક્ત્વા શઙ્કરો બ્રહ્મન્ નાનાલીલાવિશારદઃ ।
વિરરામ મુનિશ્રેષ્ઠ દર્શયઁલ્લૌકિકીં ગતિમ્ ॥ ૬૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે ગણવિવાદવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૨.૪.૧૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૧૫. પઞ્ચદશોઽધ્યાયઃ । શિવગણૈઃ સહ ગણેશયુદ્ધવર્ણનમ્ ।

બ્રહ્મોવાચ
ઇત્યુક્તા વિભુના તેન નિશ્ચયં પરમં ગતાઃ ।
સન્નદ્ધાસ્તુ તદા તત્ર જગ્મુશ્ચ શિવમન્દિરમ્ ॥ ૧॥

ગણેશોઽપિ તથા દૃષ્ટ્વા હ્યાયાતાન્ગણસત્તમાન્ ।
યુદ્ધાઽઽટોપં વિધાયૈવ સ્થિતાંશ્ચૈવાબ્રવીદિદમ્ ॥ ૨॥

ગણેશ ઉવાચ
આયાન્તુ ગણપાઃ સર્વે શિવાજ્ઞાપરિપાલકાઃ ।
અહમેકશ્ચ બાલશ્ચ શિવાજ્ઞાપરિપાલકઃ ॥ ૩॥

તથાપિ પશ્યતાં દેવી પાર્વતી સૂનુજં બલમ્ ।
શિવશ્ચ સ્વગણાનાં તુ બલં પશ્યતુ વૈ પુનઃ ॥ ૪॥

બલવદ્બાલયુદ્ધં ચ ભવાનીશિવપક્ષયોઃ ।
ભવદ્ભિશ્ચ કૃતં યુદ્ધં પૂર્વં યુદ્ધવિશારદૈઃ ॥ ૫॥

મયા પૂર્વં કૃતં નૈવ બાલોઽસ્મિ ક્રિયતેઽધુના ।
તથાપિ ભવતાં લજ્જા ગિરિજાશિવયોરિહ ॥ ૬॥

મમૈવં તુ ભવેન્નૈવ વૈપરીત્યં ભવિષ્યતિ ।
મમૈવ ભવતાં લજ્જા ગિરિજાશિવયોરિહ ॥ ૭॥

એવં જ્ઞાત્વા ચ કર્ત્તવ્યઃ સમરશ્ચ ગણેશ્વરાઃ ।
ભવદ્ભિઃ સ્વામિનં દૃષ્ટ્વા મયા ચ માતરં તદા ॥ ૮॥

ક્રિયતે કીદૃશં યુદ્ધં ભવિતવ્યં ભવત્વિતિ ।
તસ્ય વૈ વારણે કોઽપિ ન સમર્થસ્ત્રિલોકકે ॥ ૯॥

બ્રહ્મોવાચ
ઇત્યેવં ભર્ત્સિતાસ્તે તુ દણ્ડભૂષિતબાહવઃ ।
વિવિધાન્યાયુધાન્યેવં ધૃત્વા તે ચ સમાયયુઃ ॥ ૧૦॥

ઘર્ષયન્તસ્તથા દન્તાન્ હુઙ્કૃત્ય ચ પુનઃ પુનઃ ।

પશ્ય પશ્ય બ્રુવન્તશ્ચ ગણાસ્તે સમુપાગતાઃ ॥ ૧૧॥

નન્દી પ્રથમમાગત્ય ધૃત્વા પાદં વ્યકર્ષયત્ ।
ધાવન્ભૃઙ્ગી દ્વિતીયં ચ પાદં ધૃત્વા ગણસ્ય ચ ॥ ૧૨॥

યાવત્પાદે વિકર્ષન્તૌ તાવદ્ધસ્તેન વૈ ગણઃ ।
આહત્ય હસ્તયોસ્તાભ્યામુત્ક્ષિપ્તૌ પાદકૌ સ્વયમ્ ॥ ૧૩॥

અથ દેવીસુતો વીરસ્સઙ્ગૃહ્ય પરિઘં બૃહત્ ।
દ્વારસ્થિતો ગણપતિઃ સર્વાનાપોથયત્તદા ॥ ૧૪॥

કેષાઞ્ચિત્પાણયો ભિન્નાઃ કેષાઞ્ચિત્પૃષ્ઠકાનિ ચ ।
કેષાઞ્ચિચ્ચ શિરાંસ્યેવ કેષાઞ્ચિન્મસ્તકાનિ ચ ॥ ૧૫॥

કેષાઞ્ચિજ્જાનુની તત્ર કેષાઞ્ચિત્સ્કન્ધકાસ્તથા ।
કેષાઞ્ચિજ્જાનુની તત્ર કેષાઞ્ચિત્સ્કન્ધાસ્તથા ।
સમ્મુખે ચાગતા યે વૈ તે સર્વે હૃદયે હતાઃ ॥ ૧૬॥

કેચિચ્ચ પતિતા ભૂમૌ કેચિચ્ચ વિદિશો ગતાઃ ।
કેષાઞ્ચિચ્ચરણૌ છિન્નૌ કેચિચ્છર્વાન્તિકં ગતાઃ ॥ ૧૭॥

તેષાં મધ્યે તુ કશ્ચિદ્વૈ સઙ્ગ્રામે સમ્મુખો ન હિ ।
સિંહં દૃષ્ટ્વા યથા યાન્તિ મૃગાશ્ચૈવ દિશો દશ ॥ ૧૮॥

તથા તે ચ ગણાઃ સર્વે ગતાશ્ચૈવ સહસ્રશઃ ।
પરાવૃત્ય તથા સોઽપિ સુદ્વારિ સમુપસ્થિતઃ ॥ ૧૯॥

કલ્પાન્તકરણે કાલો દૃશ્યતે ચ ભયઙ્કરઃ ।
યથા તથૈવ દૃષ્ટઃ સ સર્વેષાં પ્રલયઙ્કરઃ ॥ ૨૦॥

એતસ્મિન્સમયે ચૈવ સરમેશસુરેશ્વરાઃ ।
પ્રેરિતા નારદેનેહ દેવાઃ સર્વે સમાગમન્ ॥ ૨૧॥

સમબ્રુવંસ્તદા સર્વે શિવસ્ય હિતકામ્યયા ।
પુરઃ સ્થિત્વા શિવં નત્વા હ્યાજ્ઞાં દેહિ પ્રભો ઇતિ ॥ ૨૨॥

ત્વં પરબ્રહ્મ સર્વેશઃ સર્વે ચ તવ સેવકાઃ ।
સૃષ્ટેઃ કર્તા સદા ભર્તા સંહર્તા પરમેશ્વરઃ ॥ ૨૩॥

રજસ્સત્ત્વતમોરૂપો લીલયા નિર્ગુણઃ સ્વતઃ ।
કા લીલા રચિતા ચાદ્ય તામિદાનીં વદ પ્રભો ॥ ૨૪॥

બ્રહ્મોવાચ
ઇત્યાકર્ણ્ય વચસ્તેષાં મુનિશ્રેષ્ઠ મહેશ્વરઃ ।
ગણાન્ ભિન્નાઁસ્તદા દૃષ્ટ્વા તેભ્યસ્સર્વં ન્યવેદયત્ ॥ ૨૫॥

અથ સર્વેશ્વરસ્તત્ર શઙ્કરો મુનિસત્તમ ।
વિહસ્ય ગિરિજાનાથો બ્રહ્માણં મામુવાચ હ ॥ ૨૬॥

શિવ ઉવાચ
બ્રહ્મઞ્છૃણુ મમ દ્વારિ બાલ એકઃ સમાસ્થિતઃ ।
મહાબલો યષ્ટિપાણિર્ગેહાવેશનિવારકઃ ॥ ૨૭॥

મહાપ્રહારકર્તાઽસૌ મત્પાર્ષદવિઘાતકઃ ।
પરાજયઃ કૃતસ્તેન મદ્ગણાનાં બલાદિહ ॥ ૨૮॥

બ્રહ્મન્ ત્વયૈવ ગન્તવ્યં પ્રસાદ્યોઽયં મહાબલઃ ।
યથા બ્રહ્મન્નયઃ સ્યાદ્વૈ તથા કાર્યં ત્વયા વિધે ॥ ૨૯॥

બ્રહ્મોવાચ
ઇત્યાકર્ણ્ય પ્રભોર્વાક્યમજ્ઞાત્વાઽજ્ઞાનમોહિતઃ ।
તદીયનિકટં તાત સર્વૈરૃષિવરૈરયામ્ ॥ ૩૦॥

સમાયાન્તં ચ માં દૃષ્ટ્વા સ ગણેશો મહાબલી ।
ક્રોધં કૃત્વા સમભ્યેત્ય મમ શ્મશ્રૂણ્યવાકિરત્ ॥ ૩૧॥

ક્ષમ્યતાં ક્ષમ્યતાં દેવ ન યુદ્ધાર્થં સમાગતઃ ।
બ્રાહ્મણોઽહમનુગ્રાહ્યઃ શાન્તિકર્તાનુપદ્રવઃ ॥ ૩૨॥

ઇત્યેવં બ્રુવતિ બ્રહ્મંસ્તાવત્પરિઘમાદદે ।
સ ગણેશો મહાવીરો બાલોઽબાલપરાક્રમઃ ॥ ૩૩॥

ગૃહીતપરિઘં દૃષ્ટ્વા તં ગણેશં મહાબલમ્ ।
પલાયનપરો યાતસ્ત્વહં દ્રુતતરં તદા ॥ ૩૪॥

યાત યાત બ્રુવન્તસ્તે પરિઘેન હતાસ્તદા ।
સ્વયં ચ પતિતાઃ કેચિત્કેચિત્તેન નિપાતિતાઃ ॥ ૩૫॥

કેચિચ્ચ શિવસામીપ્યં ગત્વા તત્ક્ષણમાત્રતઃ ।
શિવં વિજ્ઞાપયાઞ્ચક્રુસ્તદ્વૃત્તાન્તમશેષતઃ ॥ ૩૬॥

તથાવિધાંશ્ચ તાન્ દૃષ્ટ્વા તદ્વૃત્તાન્તં નિશમ્ય સઃ ।
અપારમાદધે કોપં હરો લીલાવિશારદઃ ॥ ૩૭॥

ઇન્દ્રાદિકાન્દેવગણાન્ ષણ્મુખપ્રવરાન્ ગણાન્ ।
ભૂતપ્રેતપિશાચાંશ્ચ સર્વાનાદેશયત્તદા ॥ ૩૮॥

તે સર્વે ચ યથાયોગ્યં ગતાસ્તે સર્વતો દિશમ્ ।
તં ગણં હન્તુકામા હિ શિવાજ્ઞપ્તા ઉદાયુધાઃ ॥ ૩૯॥

યસ્ય યસ્યાયુધં યચ્ચ તત્તત્સર્વં વિશેષતઃ ।
તદ્ ગણેશોપરિ બલાત્સમાગત્ય વિમોચિતમ્ ॥ ૪૦॥

હાહાકારો મહાનાસીત્ ત્રૈલોક્યે સચરાચરે ।
ત્રિલોકસ્થા જનાઃ સર્વે સંશયં પરમં ગતાઃ ॥ ૪૧॥

ન યાતં બ્રહ્મણોઽપ્યાયુર્બ્રહ્માણ્ડં ક્ષયમેતિ હિ ।
અકાલે ચ તથા નૂનં શિવેચ્છાવશતઃ સ્વયમ્ ॥ ૪૨॥

તે સર્વે ચાગતાસ્તત્ર ષણ્મુખાદ્યાશ્ચ યે પુનઃ ।
દેવા વ્યર્થાયુધા જાતા આશ્ચર્યં પરમં ગતાઃ ॥ ૪૩॥

એતસ્મિન્નન્તરે દેવી જગદમ્બા વિબોધના ।
જ્ઞાત્વા તચ્ચરિતં સર્વમપારં ક્રોધમાદધે ॥ ૪૪॥

શક્તિદ્વયં તદા તત્ર તયા દેવ્યા મુનીશ્વર ।
નિર્મિતં સ્વગણસ્યૈવ સર્વસાહાય્યહેતવે ॥ ૪૫॥

એકા પ્રચણ્ડરૂપં ચ ધૃત્વાતિષ્ઠન્મહામુને ।
શ્યામપર્વતસઙ્કાશં વિસ્તીર્ય મુખગહ્વરમ્ ॥ ૪૬॥

એકા વિદ્યુત્સ્વરૂપા ચ બહુહસ્તસમન્વિતા ।
ભયઙ્કરા મહાદેવી દુષ્ટદણ્ડવિધાયિની ॥ ૪૭॥

આયુધાનિ ચ સર્વાણિ મોચિતાનિ સુરૈર્ગણૈઃ ।
ગૃહીત્વા સ્વમુખે તાનિ તાભ્યાં શીઘ્રં ચ ચિક્ષિપે ॥ ૪૮॥

દેવાયુધં ન દૃશ્યેત પરિઘઃ પરિતઃ પુનઃ ।
એવં તાભ્યાં કૃતં તત્ર ચરિતં પરમાદ્ભુતમ્ ॥ ૪૯॥

એકો બાલોઽખિલં સૈન્યં લોડયામાસ દુસ્તરમ્ ।
યથા ગિરિવરેણૈવ લોડિતઃ સાગરઃ પુરા ॥ ૫૦॥

એકેન નિહતાઃ સર્વે શક્રાદ્યા નિર્જરાસ્તથા ।
શઙ્કરસ્ય ગણાશ્ચૈવ વ્યાકુલા અભવંસ્તદા ॥ ૫૧॥

અથ સર્વે મિલિત્વા તે નિઃશ્વસ્ય ચ મુહુર્મુહુઃ ।
પરસ્પરં સમૂચુસ્તે તત્પ્રહારસમાકુલાઃ ॥ ૫૨॥

દેવગણા ઊચુઃ
કિં કર્તવ્યં ક્વ ગન્તવ્યં ન જ્ઞાયન્તે દિશો દશ ।
પરિઘં ભ્રામયત્યેષ સવ્યાપસવ્યમેવ ચ ॥ ૫૩॥

બ્રહ્મોવાચ
એતત્કાલેઽપ્સરઃ શ્રેષ્ઠાઃ પુષ્પચન્દનપાણયઃ ।
ઋષયશ્ચ ત્વદાદ્યા હિ યેઽતિયુદ્ધેઽતિલાલસાઃ ॥ ૫૪॥

તે સર્વે ચ સમાજગ્મુર્યુદ્ધસન્દર્શનાય વૈ ।
પૂરિતો વ્યોમ સન્માર્ગસ્તૈસ્તદા મુનિસત્તમ ॥ ૫૫॥

તાસ્તે દૃષ્ટ્વા રણં તં વૈ મહાવિસ્મયમાગતાઃ ।
ઈદૃશં પરમં યુદ્ધં ન દૃષ્ટં ચૈકદાપિ હિ ॥ ૫૬॥

પૃથિવી કમ્પિતા તત્ર સમુદ્રસહિતા તદા ।
પર્વતાઃ પતિતાશ્ચૈવ ચક્રુઃ સઙ્ગ્રામસમ્ભવમ્ ॥ ૫૭॥

દ્યૌર્ગ્રહર્ક્ષગણૈર્ઘૂર્ણા સર્વે વ્યાકુલતાં ગતાઃ ।
દેવાઃ પલાયિતાઃસર્વે ગણાશ્ચ સકલાસ્તદા ॥ ૫૮॥

કેવલં ષણ્મુખસ્તત્ર નાપલાયત વિક્રમી ।
મહાવીરસ્તદા સર્વાનાવાર્ય પુરતઃ સ્થિતઃ ॥ ૫૯॥

શક્તિદ્વયેન તદ્યુદ્ધે સર્વે ચ નિષ્ફલીકૃતાઃ ।
સર્વાસ્ત્રાણિ નિકૃત્તાનિ સક્ષિપ્તાન્યમરૈર્ગણૈઃ ॥ ૬૦॥

યેઽવસ્થિતાશ્ચ તે સર્વે શિવસ્યાન્તિકમાગતાઃ ।
દેવાઃ પલાયિતાઃ સર્વે ગણાશ્ચ સકલાસ્તદા ॥ ૬૧॥

તે સર્વે મિલિતાશ્ચૈવ મુહુર્નત્વા શિવં તદા ।
અબ્રુવન્વચનં ક્ષિપ્રં કોઽયં ગણવરઃ પ્રભો ॥ ૬૨॥

પુરા ચૈવ શ્રુતં યુદ્ધમિદાનીં બહુધા પુનઃ ।

દૃશ્યતે ન શ્રુતં દૃષ્ટમીદૃશં તુ કદાચન ॥ ૬૩॥

કિઞ્ચિદ્વિચાર્યતાં દેવ ત્વન્યથા ન જયો ભવેત્ ।
ત્વમેવ રક્ષકઃ સ્વામિન્બ્રહ્માણ્ડસ્ય ન સંશયઃ ॥ ૬૪॥

બ્રહ્મોવાચ
ઇત્યેવં તદ્વચઃ શ્રુત્વા રુદ્રઃ પરમકોપનઃ ।
કોપં કૃત્વા ચ તત્રૈવ જગામ સ્વગણૈઃ સહ ॥ ૬૫॥

દેવસૈન્યં ચ તત્સર્વં વિષ્ણુના ચક્રિણા સહ ।
સમુત્સવં મહત્કૃત્વા શિવસ્યાનુજગામ હ ॥ ૬૬॥

એતસ્મિન્નન્તરે ભક્ત્યા નમસ્કૃત્ય મહેશ્વરમ્ ।
અબ્રવીન્નારદ ત્વં વૈ દેવદેવં કૃતાઞ્જલિઃ ॥ ૬૭॥

નારદ ઉવાચ
દેવદેવ મહાદેવ શ‍ૃણુ મદ્વચનં વિભો ।
ત્વમેવ સર્વગસ્સ્વામી નાનાલીલાવિશારદઃ ॥ ૬૮॥

ત્વયા કૃત્વા મહાલીલાં ગણગર્વોઽપહારિતઃ ।
અસ્મૈ દત્ત્વા બલં ભૂરિ દેવગર્વશ્ચ શઙ્કર ॥ ૬૯॥

દર્શિતં ભુવને નાથ સ્વમેવ બલમદ્ભુતમ્ ।
સ્વતન્ત્રેણ ત્વયા શમ્ભો સર્વગર્વપ્રહારિણા ॥ ૭૦॥

ઇદાનીં ન કુરુષ્વેશ તાં લીલાં ભક્તવત્સલઃ ।
સ્વગણાનમરાંશ્ચાપિ સુસન્માન્યાભિવર્દ્ધય ॥ ૭૧॥

ઇમં ન ખેલયેદાનીં જહિ બ્રહ્મપદપ્રદ ।
ઇત્યુક્ત્વા નારદ ત્વં વૈ હ્યન્તર્દ્ધાનં ગતસ્તદા ॥ ૭૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે ગણેશયુદ્ધવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૨.૪.૧૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૧૬. ષોડશોઽધ્યાયઃ । ગણેશશિરશ્છેદનવર્ણનમ્ ।

બ્રહ્મોવાચ

ઇતિ શ્રુત્વા મહેશાનો ભક્તાનુગ્રહકારકઃ ।
ત્વદ્વાચા યુદ્ધકામોઽભૂત્તેન બાલેન નારદ ॥ ૧॥

વિષ્ણુમાહૂય સમ્મન્ત્ર્ય બલેન મહતા યુતઃ ।
સામરઃ સમ્મુખસ્તસ્યાપ્યભૂદ્દેવસ્ત્રિલોચનઃ ॥ ૨॥

દેવાશ્ચ યુયુધુસ્તેન સ્મૃત્વા શિવપદામ્બુજમ્ ।
મહાબલા મહોત્સાહાશ્શિવસદ્દૃષ્ટિલોકિતાઃ ॥ ૩॥

યુયુધેઽથ હરિસ્તેન મહાબલપરાક્રમઃ ।
મહાદેવ્યાયુધો વીરઃ પ્રવણઃ શિવરૂપકઃ ॥ ૪॥

યષ્ટ્યા ગણાધિપઃ સોઽથ જઘાનામરપુઙ્ગવાન્ ।
હરિં ચ સહસા વીરઃ શક્તિદત્તમહાબલઃ ॥ ૫॥

સર્વેઽમરગણાસ્તત્ર વિકુણ્ઠિતબલા મુને ।
અભૂવન્ વિષ્ણુના તેન હતા યષ્ટ્યા પરાઙ્મુખાઃ ॥ ૬॥

શિવોઽપિ સહ સૈન્યેન યુદ્ધં કૃત્વા ચિરં મુને ।
વિકરાલં ચ તં દૃષ્ટ્વા વિસ્મયં પરમં ગતઃ ॥ ૭॥

છલેનૈવ ચ હન્તવ્યો નાન્યથા હન્યતે પુનઃ ।
ઇતિ બુદ્ધિં સમાસ્થાય સૈન્યમધ્યે વ્યવસ્થિતઃ ॥ ૮॥

શિવે દૃષ્ટે તદા દેવે નિર્ગુણે ગુણરૂપિણિ ।
વિષ્ણૌ ચૈવાથ સઙ્ગ્રામે આયાતે સર્વદેવતાઃ ॥ ૯॥

ગણાશ્ચૈવ મહેશસ્ય મહાહર્ષં તદા યયુઃ ।
સર્વે પરસ્પરં પ્રીત્યા મિલિત્વા ચક્રુરુત્સવમ્ ॥ ૧૦॥

અથ શક્તિસુતો વીરો વીરગત્યા સ્વયષ્ટિતઃ ।
પ્રથમં પૂજયામાસ વિષ્ણું સર્વસુખાવહમ્ ॥ ૧૧॥

અહં ચ મોહયિષ્યામિ હન્યતાં ચ ત્વયા વિભો ।
છલં વિના ન વધ્યોઽયં તામસોઽયં દુરાસદઃ ॥ ૧૨॥

ઇતિ કૃત્વા મતિં તત્ર સુસમ્મન્ત્ર્ય ચ શમ્ભુના ।
આજ્ઞાં પ્રાપ્યાઽભવચ્છૈવીં વિષ્ણુર્મોહપરાયણઃ ॥ ૧૩॥

શક્તિદ્વયં તથા લીનં હરિં દૃષ્ટ્વા તથાવિધમ્ ।
દત્ત્વા શક્તિબલં તસ્મૈ ગણેશાયાભવન્મુને ॥ ૧૪॥

શક્તિદ્વયેઽથ સંલીને યત્ર વિષ્ણુઃ સ્થિતઃ સ્વયમ્ ।
પરિઘં ક્ષિપ્તવાંસ્તત્ર ગણેશો બલવત્તરઃ ॥ ૧૫॥

કૃત્વા યત્નં કિમપ્યત્ર વઞ્ચયામાસ તદ્ગતિમ્ ।
શિવં સ્મૃત્વા મહેશાનં સ્વપ્રભું ભક્તવત્સલમ્ ॥ ૧૬॥

એકતસ્તન્મુખં દૃષ્ટ્વા શઙ્કરોઽપ્યાજગામ હ ।
સ્વત્રિશૂલં સમાદાય સુક્રુદ્ધો યુદ્ધકામ્યયા ॥ ૧૭॥

સ દદર્શાગતં શમ્ભું શૂલહસ્તં મહેશ્વરમ્ ।
હન્તુકામં નિજં વીરઃ શિવાપુત્રો મહાબલઃ ॥ ૧૮॥

શક્ત્યા જઘાન તં હસ્તે સ્મૃત્વા માતૃપદામ્બુજમ્ ।
સ ગણશો મહાવીરઃ શિવશક્તિપ્રવર્દ્ધિતઃ ॥ ૧૯॥

ત્રિશૂલં પતિતં હસ્તાચ્છિવસ્ય પરમાત્મનઃ ।
દૃષ્ટ્વા સદૂતિકસ્તં વૈ પિનાકં ધનુરાદદે ॥ ૨૦॥

તમપ્યપાતયદ્ભૂમૌ પરિઘેણ ગણેશ્વરઃ ।
હતાઃ પઞ્ચ તથા હસ્તાઃ પઞ્ચભિશ્શૂલમાદદે ॥ ૨૧॥

અહો દુઃખતરં નૂનં સઞ્જાતમધુના મમ ।
ભવેત્પુનર્ગણાનાં કિં ભવાચારો જગાવિતિ ॥ ૨૨॥

એતસ્મિન્નન્તરે વીરઃ પરિઘેણ ગણેશ્વરઃ ।
જઘાન સગણાન્ દેવાન્ શક્તિદત્તબલાન્વિતઃ ॥ ૨૩॥

ગતા દશદિશો દેવાઃ સગણાઃ પરિઘાર્દિતાઃ ।
ન તસ્થુઃસમરે કેઽપિ તેનાદ્ભુતપ્રહારિણા ॥ ૨૪॥

વિષ્ણુસ્તં ચ ગણં દૃષ્ટ્વા ધન્યોઽયમિતિ ચાબ્રવીત્ ।
મહાબલો મહાવીરો મહાશૂરો રણપ્રિયઃ ॥ ૨૫॥

બહવો દેવતાશ્ચૈવ મયા દૃષ્ટાસ્તથા પુનઃ ।
દાનવા બહવો દૈત્યા યક્ષગન્ધર્વરાક્ષસાઃ ॥ ૨૬॥

નૈતેન ગણનાથેન સમતાં યાન્તિ કેઽપિ ચ ।

ત્રૈલોક્યેઽપ્યખિલે તેજો રૂપશૌર્યગુણાદિભિઃ ॥ ૨૭॥

એવં સમ્બ્રુવતેઽમુષ્મૈ પરિઘં ભ્રામયન્ સ ચ ।
ચિક્ષેપ વિષ્ણવે તત્ર શક્તિપુત્રો ગણેશ્વરઃ ॥ ૨૮॥

ચક્રં ગૃહીત્વા હરિણા સ્મૃત્વા શિવપદામ્બુજમ્ ।
તેન ચક્રેણ પરિઘો દ્રુતં ખણ્ડીકૃતસ્તદા ॥ ૨૯॥

ખણ્ડં તુ પરિઘસ્યાપિ હરયે પ્રાક્ષિપદ્ગણઃ ।
ગૃહીત્વા ગરુડેનાપિ પક્ષિણા વિફલીકૃતઃ ॥ ૩૦॥

એવં વિચરિતં કાલં મહાવીરાવુભાવપિ ।
વિષ્ણુશ્ચાપિ ગણશ્ચૈવ યુયુધાતે પરસ્પરમ્ ॥ ૩૧॥

પુનર્વીરવરઃ શક્તિસુતઃસ્મૃતશિવો બલી ।
ગૃહીત્વા યષ્ટિમતુલાં તયા વિષ્ણું જઘાન હ ॥ ૩૨॥

અવિષહ્ય પ્રહારં તં સ ભૂમૌ નિપપાત હ ।
દ્રુતમુત્થાય યુયુધે શિવાપુત્રેણ તેન વૈ ॥ ૩૩॥

એતદન્તરમાસાદ્ય શૂલપાણિસ્તથોત્તરે ।
આગત્ય ચ ત્રિશૂલેન તચ્છિરો નિરકૃન્તત ॥ ૩૪॥

છિન્ને શિરસિ તસ્યૈવ ગણનાથસ્ય નારદ ।
ગણસૈન્યં દેવસૈન્યમભવચ્ચ સુનિશ્ચલમ્ ॥ ૩૫॥

નારદેન ત્વયાઽઽગત્ય દેવ્યૈ સર્વં નિવેદિતમ્ ।
માનિનિ શ્રૂયતાં માનસ્ત્યાજ્યો નૈવ ત્વયાધુના ॥ ૩૬॥

ઇત્યુક્ત્વાઽન્તર્હિતસ્તત્ર નારદ ત્વં કલિપ્રિયઃ ।
અવિકારી સદા શમ્ભુર્મનોગતિકરો મુનિઃ ॥ ૩૭॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે ગણેશયુદ્ધગણેશશિરશ્છેદનવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૨.૪.૧૬॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૧૭. સપ્તદશોઽધ્યાયઃ । ગણેશદેહે ગજમુખયોજનવર્ણનમ્ ।

નારદ ઉવાચ

બ્રહ્મન્ વદ મહાપ્રાજ્ઞ તદ્ વૃત્તાન્તેઽખિલે શ્રુતે ।
કિમકાર્ષીન્મહાદેવી શ્રોતુમિચ્છામિ તત્ત્વતઃ ॥ ૧॥

બ્રહ્મોવાચ

શ્રૂયતાં મુનિશાર્દૂલ કથયામ્યદ્ય તદ્ધ્રુવમ્ ।
ચરિતં જગદમ્બાયા યજ્જાતં તદનન્તરમ્ ॥ ૨॥

મૃદઙ્ગાન્પટહાંશ્ચૈવ ગણાશ્ચાવાદયંસ્તથા ।
મહોત્સવં તદા ચક્રુર્હતે તસ્મિન્ગણાધિપે ॥ ૩॥

શિવોઽપિ તચ્છિરશ્છિત્વા યાવદ્દુઃખમુપાદદે ।
તાવચ્ચ ગિરિજા દેવી ચુક્રોધાતિ મુનીશ્વર ॥ ૪॥

કિં કરોમિ ક્વ ગચ્છામિ હાહા દુઃખમુપાગતમ્ ।
કથં દુઃખં વિનશ્યેતાસ્યાઽતિદુઃખં મમાધુના ॥ ૫॥

મત્સુતો નાશિતશ્ચાદ્ય દેવૈઃ સર્વૈર્ગણૈસ્તથા ।
સર્વાંસ્તાન્નાશયિષ્યામિ પ્રલયં વા કરોમ્યહમ્ ॥ ૬॥

ઇત્યેવં દુઃખિતા સા ચ શક્તીઃ શતસહસ્રશઃ ।
નિર્મમે તત્ક્ષણં ક્રુદ્ધા સર્વલોકમહેશ્વરી ॥ ૭॥

નિર્મિતાસ્તા નમસ્કૃત્ય જગદમ્બાં શિવાં તદા ।
જાજ્વલ્યમાના હ્યવદન્માતરાદિશ્યતામિતિ ॥ ૮॥

તચ્છ્રુત્વા શમ્ભુશક્તિઃ સા પ્રકૃતિઃ ક્રોધતત્પરા ।
પ્રત્યુવાચ તુ તાઃ સર્વા મહામાયા મુનીશ્વર ॥ ૯॥

દેવ્યુવાચ

હે શક્તયોઽધુના દેવ્યો યુષ્માભિર્મન્નિદેશતઃ ।
પ્રલયશ્ચાત્ર કર્ત્તવ્યો નાત્ર કાર્યા વિચારણા ॥ ૧૦॥

દેવાંશ્ચૈવ ઋષીંશ્ચૈવ યક્ષરાક્ષસકાંસ્તથા ।
અસ્મદીયાન્પરાંશ્ચૈવ સખ્યો ભક્ષત વૈ હઠાત્ ॥ ૧૧॥

બ્રહ્મોવાચ

તદાજ્ઞપ્તાશ્ચ તાઃ સર્વાઃ શક્તયઃ ક્રોધતત્પરાઃ ।

દેવાદીનાં ચ સર્વેષાં સંહારં કર્તુમુદ્યતાઃ ॥ ૧૨॥

યથા ચ તૃણસંહારમનલઃ કુરુતે તથા ।
એવં તાઃ શક્તયઃ સર્વાઃ સંહારં કર્તુમુદ્યતાઃ ॥ ૧૩॥

ગણપો વાથ વિષ્ણુર્વા બ્રહ્મા વા શઙ્કરસ્તથા ।
ઇન્દ્રો વા યક્ષરાજો વા સ્કન્દો વા સૂર્ય એવ વા ॥ ૧૪॥

સર્વેષાં ચૈવ સંહારં કુર્વન્તિ સ્મ નિરન્તરમ્ ।
યત્ર યત્ર તુ દૃશ્યેત તત્ર તત્રાપિ શક્તયઃ ॥ ૧૫॥

કરાલી કુબ્જકા ખઞ્જા લમ્બશીર્ષા હ્યનેકશઃ ।
હસ્તે ધૃત્વા તુ દેવાંશ્ચ મુખે ચૈવાક્ષિપંસ્તદા ॥ ૧૬॥

તં સંહારં તદા દૃષ્ટ્વા હરો બ્રહ્મા તથા હરિઃ ।
ઇન્દ્રાદયોઽખિલા દેવા ગણાશ્ચ ઋષયસ્તથા ॥ ૧૭॥

કિં કરિષ્યતિ સા દેવી સંહારં વાપ્યકાલતઃ ।
ઇતિ સંશયમાપન્ના જીવનાશા હતાઽભવત્ ॥ ૧૮॥

સર્વે ચ મિલિતાશ્ચેમે કિં કર્ત્તવ્યં વિચિન્ત્યતામ્ ।
એવં વિચારયન્તસ્તે તૂર્ણમૂચુઃ પરસ્પરમ્ ॥ ૧૯॥

યદા ચ ગિરિજા દેવી પ્રસન્ના હિ ભવેદિહ ।
તદા ચૈવ ભવેત્સ્વાસ્થ્યં નાન્યથા કોટિ યત્નતઃ ॥ ૨૦॥

શિવોઽપિ દુઃખમાપન્નો લૌકિકીં ગતિમાશ્રિતઃ ।
મોહયન્સકલાંસ્તત્ર નાનાલીલાવિશારદઃ ॥ ૨૧॥

સર્વેષાં ચૈવ દેવાનાં કટિર્ભગ્ના યદા તદા ।
શિવા ક્રોધમયી સાક્ષાદ્ ગન્તું ન પુર ઉત્સહેત્ ॥। ૨૨॥

સ્વીયો વા પરકીયો વા દેવો વા દાનવોઽપિ વા ।
ગણો વાપિ ચ દિક્પાલો યક્ષો વા કિન્નરો મુનિઃ ॥ ૨૩॥

વિષ્ણુર્વાપિ તથા બ્રહ્મા શઙ્કરશ્ચ તથા પ્રભુઃ ।
ન કશ્ચિદ્ગિરિજાગ્રે ચ સ્થાતું શક્તોઽભવન્મુને ॥ ૨૪॥

જાજ્વલ્યમાનં તત્તેજઃસર્વતો દાહિ તેઽખિલાઃ ।
દૃષ્ટ્વા ભીતતરા આસન્ સર્વે દૂરતરં સ્થિતાઃ ॥ ૨૫॥

એતસ્મિન્સમયે તત્ર નારદો દિવ્યદર્શનઃ ।
આગતસ્ત્વં મુને દેવગણાનાં સુખહેતવે ॥ ૨૬॥

બ્રહ્માણં માં ભવં વિષ્ણું શઙ્કરં ચ પ્રણમ્ય સઃ ।
સમાગત્ય મિલિત્વોચે વિચાર્ય કાર્યમેવ વા ॥ ૨૭॥

સર્વે સમ્મન્ત્રયાઞ્ચક્રુસ્ત્વયા દેવા મહાત્મના ।
દુઃખશાન્તિઃ કથં સ્યાદ્વૈ સમૂચુસ્તત એવ તે ॥ ૨૮॥

યાવચ્ચ ગિરિજા દેવી કૃપાં નૈવ કરિષ્યતિ ।
તાવન્નૈવ સુખં સ્યાદ્વૈ નાત્ર કાર્યા વિચારણા ॥ ૨૯॥

ઋષયો હિ ત્વદાદ્યાશ્ચ ગતાસ્તે વૈ શિવાન્તિકમ્ ।
સર્વે પ્રસાદયામાસુઃ ક્રોધશાન્ત્યૈ તદા શિવામ્ ॥ ૩૦॥

પુનઃ પુનઃ પ્રણેમુશ્ચ સ્તુત્વા સ્તોત્રૈરનેકશઃ ।
સર્વે પ્રસાદયન્પ્રીત્યા પ્રોચુર્દેવગણાજ્ઞયા ॥ ૩૧॥

સુરર્ષય ઊચુઃ ।
જગદમ્બ નમસ્તુભ્યં શિવાયૈ તે નમોઽસ્તુ તે ।
ચણ્ડિકાયૈ નમસ્તુભ્યં કલ્યાણ્યૈ ચ નમોઽસ્તુ તે ॥ ૩૨॥

આદિશક્તિસ્ત્વમેવામ્બ સર્વસૃષ્ટિકરી સદા ।
ત્વમેવ પાલિની શક્તિસ્ત્વમેવ પ્રલયઙ્કરી ॥ ૩૩॥

પ્રસન્ના ભવ દેવેશિ શાન્તિં કુરુ નમોઽસ્તુ તે ।
સર્વં હિ વિકલં દેવિ ત્રિજગત્તવ કોપતઃ ॥ ૩૪॥

બ્રહ્મોવાચ
એવં સ્તુતા પરા દેવી ઋષિભિશ્ચ ત્વદાદિભિઃ ।
ક્રુદ્ધદૃષ્ટ્યા તદા તાંશ્ચ કિઞ્ચિન્નોવાચ સા શિવા ॥ ૩૫॥

તદા ચ ઋષયઃ સર્વે નત્વા તચ્ચરણામ્બુજમ્ ।
પુનરૂચુશ્શિવાં ભક્ત્યા કૃતાઞ્જલિપુટાઃ શનૈઃ ॥ ૩૬॥

ક્ષમ્યતાં ક્ષમ્યતાં દેવિ સંહારો જાયતેઽધુના ।
તવ સ્વામી સ્થિતશ્ચાત્ર પશ્ય પશ્ય તમમ્બિકે ॥ ૩૭॥

વયં કે ચ ઇમે દેવા વિષ્ણુબ્રહ્માદયસ્તથા ।
પ્રજાશ્ચ ભવદીયાશ્ચ કૃતાઞ્જલિપુટાઃ સ્થિતાઃ ॥ ૩૮॥

ક્ષન્તવ્યશ્ચાપરાધો વૈ સર્વેષાં પરમેશ્વરિ ।
સર્વે હિ વિકલાશ્ચાદ્ય શાન્તિં તેષાં શિવે કુરુ ॥ ૩૯॥

બ્રહ્મોવાચ
ઇત્યુક્ત્વા ઋષયઃસર્વે સુદીનતરમાકુલાઃ ।
સન્તસ્થિરે ચણ્ડિકાગ્રે કૃતાઞ્જલિપુટાસ્તદા ॥ ૪૦॥

એવં શ્રુત્વા વચસ્તેષાં પ્રસન્ના ચણ્ડિકાઽભવત્ ।
પ્રત્યુવાચ ઋષીંસ્તાન્વૈ કરુણાવિષ્ટમાનસા ॥ ૪૧॥

દેવ્યુવાચ
મત્પુત્રો યદિ જીવેત તદા સંહરણં ન હિ ।
યથા હિ ભવતાં મધ્યે પૂજ્યોઽયં ચ ભવિષ્યતિ ॥ ૪૨॥

સર્વાધ્યક્ષો ભવેદદ્ય યૂયં કુરુત તદ્યદિ ।
તદા શાન્તિર્ભવેલ્લોકે નાન્યથા સુખમાપ્સ્યથ ॥ ૪૩॥

બ્રહ્મોવાચ
ઇત્યુક્તાસ્તે તદા સર્વે ઋષયો યુષ્મદાદયઃ ।
તેભ્યો દેવેભ્ય આગત્ય સર્વં વૃત્તં ન્યવેદયન્ ॥ ૪૪॥

તે ચ સર્વે તથા શ્રુત્વા શઙ્કરાય ન્યવેદયન્ ।
નત્વા પ્રાઞ્જલયો દીનાઃ શક્રપ્રભૃતયઃ સુરાઃ ॥ ૪૫॥

પ્રોવાચેતિ સુરાઞ્છ્રુત્વા શિવશ્ચાપિ તથા પુનઃ ।
કર્ત્તવ્યં ચ તથા સર્વલોકસ્વાસ્થ્યં ભવેદિહ ॥ ૪૬॥

ઉત્તરસ્યાં પુનર્યાત પ્રથમં યો મિલેદિહ ।
તચ્છિરશ્ચ સમાહૃત્ય યોજનીયં કલેવરે ॥ ૪૭॥

બ્રહ્મોવાચ
તતસ્તૈસ્તત્કૃતં સર્વં શિવાજ્ઞાપ્રતિપાલકૈઃ ।
કલેવરં સમાનીય પ્રક્ષાલ્ય વિધિવચ્ચ તત્ ॥ ૪૮॥

પૂજયિત્વા પુનસ્તે વૈ ગતાશ્ચોદઙ્મુખાસ્તદા ।
પ્રથમં મિલિતસ્તત્ર હસ્તી ચાપ્યેકદન્તકઃ ॥ ૪૯॥

તચ્છિરશ્ચ તદા નીત્વા તત્ર તેઽયોજયન્ ધ્રુવમ્ ।
સંયોજ્ય દેવતાઃસર્વાઃ શિવં વિષ્ણું વિધિં તદા ॥ ૫૦॥

પ્રણમ્ય વચનં પ્રોચુર્ભવદુક્તં કૃતં ચ નઃ ।
અનન્તરં ચ તત્કાર્યં ભવતાદ્ભવશેષિતમ્ ॥ ૫૧॥

તતસ્તે તુ વિરેજુશ્ચ પાર્ષદાશ્ચ સુરાઃ સુખમ્ ।
અથ તદ્વચનં શ્રુત્વા શિવોક્તં પર્યપાલયન્ ॥ ૫૨॥

ઊચુસ્તે ચ તદા તત્ર બ્રહ્મવિષ્ણુસુરાસ્તથા ।
પ્રણમ્યેશં શિવં દેવં સ્વપ્રભું ગુણવર્જિતમ્ ॥ ૫૩॥

યસ્માત્ત્વત્તેજસઃસર્વે વયં જાતા મહાત્મનઃ ।
ત્વત્તેજસ્તત્સમાયાતુ વેદમન્ત્રાભિયોગતઃ ॥ ૫૪॥

ઇત્યેવમભિમન્ત્રેણ મન્ત્રિતં જલમુત્તમમ્ ।
સ્મૃત્વા શિવં સમેતાસ્તે ચિક્ષિપુસ્તત્કલેવરે ॥ ૯૫॥

તજ્જલસ્પર્શમાત્રેણ ચિદ્યુતો જીવિતો દ્રુતમ્ ।
તદોત્તસ્થૌ સુપ્ત ઇવ સ બાલશ્ચ શિવેચ્છયા ॥ ૫૬॥

સુભગઃ સુન્દરતરો ગજવક્ત્રઃ સુરક્તકઃ ।
પ્રસન્નવદનશ્ચાતિ સુપ્રભો લલિતાકૃતિઃ ॥ ૫૭॥

તં દૃષ્ટ્વા જીવિતં બાલં શિવાપુત્રં મુનીશ્વર ।
સર્વે મુમુદિરે તત્ર સર્વં દુઃખં ક્ષયં ગતમ્ ॥ ૫૮॥

દેવ્યૈ સન્દર્શયામાસુઃ સર્વે હર્ષસમન્વિતાઃ ।
જીવિતં તનયં દૃષ્ટ્વા દેવી હૃષ્ટતરાભવત્ ॥ ૫૯॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે ગણેશજીવનવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૨.૪.૧૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૧૮. અષ્ટદશોઽધ્યાયઃ । ગણેશગણાધિપપદવીપ્રાપ્તિઃ ।

નારદ ઉવાચ
જીવિતે ગિરિજાપુત્રે દેવ્યા દૃષ્ટે પ્રજેશ્વર ।

તતઃ કિમભવત્તત્ર કૃપયા તદ્વદાધુના ॥ ૧॥

બ્રહ્મોવાચ
જીવિતે ગિરિજાપુત્રે દેવ્યા દૃષ્ટે મુનીશ્વર ।
યજ્જાતં તચ્છૃણુષ્વાદ્ય વચ્મિ તં મહદુત્સવમ્ ॥ ૨॥

જીવિતઃસ શિવાપુત્રો નિર્વ્યગ્રો વિકૃતો મુને ।
અભિષિક્તસ્તદા દેવૈર્ગણાધ્યક્ષૈર્ગજાનનઃ ॥ ૩॥

દૃષ્ટ્વા સ્વતનયં દેવી શિવા હર્ષસમન્વિતા ।
ગૃહીત્વા બાલકં દોર્ભ્યાં પ્રમુદા પરિષસ્વજે ॥ ૪॥

વસ્ત્રાણિ વિવિધાનીહ નાનાલઙ્કરણાનિ ચ ।
દદૌ પ્રીત્યા ગણેશાય સ્વપુત્રાય મુદામ્બિકા ॥ ૫॥

પૂજયિત્વા તયા દેવ્યા સિદ્ધિભિશ્ચાપ્યનેકશઃ ।
કરેણ સ્પર્શિતઃ સોઽથ સર્વદુઃખહરેણ વૈ ॥ ૬॥

પૂજયિત્વા સુતં દેવી મુખમાચુમ્બ્ય શાઙ્કરી ।
વરાન્દદૌ તદા પ્રીત્યા જાતસ્ત્વં દુઃખિતોઽધુના ॥ ૭॥

ધન્યોઽસિ કૃતકૃત્યોઽસિ પૂર્વપૂજ્યો ભવાધુના ।
સર્વેષામમરાણાં વૈ સર્વદા દુઃખવર્જિતઃ ॥ ૮॥

આનને તવ સિન્દૂરં દૃશ્યતે સામ્પ્રતં યદિ ।
તસ્માત્ત્વં પૂજનીયોઽસિ સિન્દૂરેણ સદા નરૈઃ ॥ ૯॥

પુષ્પૈર્વા ચન્દનૈર્વાપિ ગન્ધેનૈવ શુભેન ચ ।
નૈવેદ્યેન સુરમ્યેણ નીરાજેન વિધાનતઃ ॥ ૧૦॥

તામ્બૂલૈરથ દાનૈશ્ચ તથા પ્રક્રમણૈરપિ ।
નમસ્કારવિધાનેન પૂજાં યસ્તે વિધાસ્યતિ ॥ ૧૧॥

તસ્ય વૈ સકલા સિદ્ધિર્ભવિષ્યતિ ન સંશયઃ ।
વિઘ્નાન્યનેકરૂપાણિ ક્ષયં યાસ્યન્ત્યસંશયમ્ ॥ ૧૨॥

બ્રહ્મોવાચ
ઇત્યુક્ત્વા ચ તદા દેવી સ્વપુત્રં તં મહેશ્વરી ।
નાનાવસ્તુભિરુત્કૃષ્ટૈઃ પુનરપ્યર્ચયત્તથા ॥ ૧૩॥

તતઃસ્વાસ્થ્યં ચ દેવાનાં ગણાનાં ચ વિશેષતઃ ।

ગિરિજાકૃપયા વિપ્ર જાતં તત્ક્ષણમાત્રતઃ ॥ ૧૪॥

એતસ્મિંશ્ચ ક્ષણે દેવા વાસવાદ્યાઃ શિવં મુદા ।
સ્તુત્વા પ્રસાદ્ય તં દેવં ભક્ત્યા નિન્યુઃ શિવાન્તિકમ્ ॥ ૧૫॥

સંસાદ્ય ગિરિશં પશ્ચાદુત્સઙ્ગે સન્ન્યવેશયન્ ।
બાલકં તં મહેશાન્યાસ્ત્રિજગત્સુખહેતવે ॥ ૧૬॥

શિવોઽપિ તસ્ય શિરસિ દત્ત્વા સ્વકરપઙ્કજમ્ ।
ઉવાચ વચનં દેવાન્ પુત્રોઽયમિતિ મેઽપરઃ ॥ ૧૭॥

ગણેશોઽપિ તદોત્થાય નમસ્કૃત્ય શિવાય વૈ ।
પાર્વત્યૈ ચ નમસ્કૃત્ય મહ્યં વૈ વિષ્ણવે તથા ॥ ૧૮॥

નારાદાદ્યાનૃષીન્સર્વાન્સ ત્વાસ્થાય પુરોઽબ્રવીત્ ।
ક્ષન્તવ્યશ્ચાપરાધો મે માનશ્ચૈવેદૃશો નૃણામ્ ॥ ૧૯॥

અહં ચ શઙ્કરશ્ચૈવ વિષ્ણુશ્ચૈતે ત્રયઃ સુરાઃ ।
પ્રત્યૂચુર્યુગપત્પ્રીત્યા દદતો વરમુત્તમમ્ ॥ ૨૦॥

ત્રયો વયં સુરવરા યથા પૂજ્યા જગત્ત્રયે ।
તથાયં ગણનાથશ્ચ સકલૈઃ પ્રતિપૂજ્યતામ્ ॥ ૨૧॥

વયં ચ પ્રાકૃતાશ્ચાયં પ્રાકૃતઃ પૂજ્ય એવ ચ ।
ગણેશો વિઘ્નહર્ત્તા હિ સર્વકામફલપ્રદઃ ॥ ૨૨॥

એતત્પૂજાં પુરા કૃત્વા પશ્ચાત્પૂજ્યા વયં નરૈઃ ।
વયં ચ પૂજિતાઃ સર્વે નાયં ચાપૂજિતો યદા ॥ ૨૩॥

અસ્મિન્નપૂજિતે દેવાઃ પરપૂજાકૃતા યદિ ।
તદા તત્ફલહાનિઃ સ્યાન્નાત્ર કાર્યા વિચારણા ॥ ૨૪॥

બ્રહ્મોવાચ
ઇત્યુક્ત્વા સ ગણેશાનો નાનાવસ્તુભિરાદરાત્ ।
શિવેન પૂજિતઃ પૂર્વં વિષ્ણુનાઽનુ પ્રપૂજિતઃ ॥ ૨૫॥

બ્રહ્મણા ચ મયા તત્ર પાર્વત્યા ચ પ્રપૂજિતઃ ।
સર્વૈર્દેવગણૈશ્ચૈવ પૂજિતઃ પરયા મુદા ॥ ૨૬॥

સર્વૈર્મિલિત્વા તત્રૈવ બ્રહ્મવિષ્ણુહરાદિભિઃ ।
સગણેશશ્શિવાતુષ્ટ્યૈ સર્વાધ્યક્ષો નિવેદિતઃ ॥ ૨૭॥

પુનશ્ચૈવ શિવેનાસ્મૈ સુપ્રસન્નેન ચેતસા ।
સર્વદા સુખદા લોકે વરા દત્તા હ્યનેકશઃ ॥ ૨૮॥

શિવ ઉવાચ
હે ગિરીન્દ્રસુતાપુત્ર સન્તુષ્ટોઽહં ન સંશયઃ ।
મયિ તુષ્ટે જગત્તુષ્ટં વિરુદ્ધઃ કોઽપિ નો ભવેત્ ॥ ૨૯॥

બાલરૂપોઽપિ યસ્માત્ત્વં મહાવિક્રમકારકઃ ।
શક્તિપુત્રઃ સુતેજસ્વી તસ્માદ્ભવ સદા સુખી ॥ ૩૦॥

ત્વન્નામ વિઘ્નહન્તૃત્વે શ્રેષ્ઠં ચૈવ ભવત્વિતિ ।
મમ સર્વગણાધ્યક્ષઃ સમ્પૂજ્યસ્ત્વં ભવાધુના ॥ ૩૧॥

એવમુક્ત્વા શઙ્કરેણ પૂજાવિધિરનેકશઃ ।
આશિષશ્ચાપ્યનેકા હિ કૃતાસ્તસ્મિંસ્તુ તત્ક્ષણાત્ ॥ ૩૨॥

તતો દેવગણાશ્ચૈવ ગીતં વાદ્યં ચ નૃત્યકમ્ ।
મુદા તે કારયામાસુસ્તથૈવાપ્સરસાં ગણાઃ ॥ ૩૩॥

પુનશ્ચૈવ વરો દત્તઃ સુપ્રસન્નેન શમ્ભુના ।
તસ્મૈ ચ ગણનાથાય શિવેનૈવ મહાત્મના ॥ ૩૪॥

ચતુર્થ્યાં ત્વં સમુત્પન્નો ભાદ્રે માસિ ગણેશ્વર ।
અસિતે ચ તથા પક્ષે ચન્દ્રસ્યોદયને શુભે ॥ ૩૫॥

પ્રથમે ચ તથા યામે ગિરિજાયાઃ સુચેતસઃ ।
આવિર્બભૂવ તે રૂપં યસ્માત્તે વ્રતમુત્તમમ્ ॥ ૩૬॥

તસ્માત્તદ્દિનમારભ્ય તસ્યામેવ તિથૌ મુદા ।
વ્રતં કાર્યં વિશેષેણ સર્વસિદ્ધ્યૈ સુશોભનમ્ ॥ ૩૭॥

યાવત્પુનઃ સમાયાતિ વર્ષાન્તે ચ ચતુર્થિકા ।
તાવદ્વ્રતં ચ કર્તવ્યં તવ ચૈવ મમાજ્ઞયા ॥ ૩૮॥

સંસારે સુખમિચ્છન્તિ યેઽતુલં ચાપ્યનેકશઃ ।
ત્વાં પૂજયન્તુ તે ભક્ત્યા ચતુર્થ્યાં વિધિપૂર્વકમ્ ॥ ૩૯॥

માર્ગશીર્ષે તથા માસે રમા યા વૈ ચતુર્થિકા ।
પ્રાતઃ સ્નાનં તદા કૃત્વા વ્રતં વિપ્રાન્નિવેદયેત્ ॥ ૪૦॥

દૂર્વાભિઃ પૂજનં કાર્યમુપવાસસ્તથાવિધઃ ।
રાત્રેશ્ચ પ્રહરે જાતે સ્નાત્વા સમ્પૂજયેન્નરઃ ॥ ૪૧॥

મૂર્તિં ધાતુમયીં કૃત્વા પ્રવાલસમ્ભવાં તથા ।
શ્વેતાર્કસમ્ભવાં ચાપિ માર્દ્દિકાં નિર્મિતાં તથા ॥ ૪૨॥

પ્રતિષ્ઠાપ્ય તદા તત્ર પૂજયેત્પ્રયતઃ પુમાન્ ।
ગન્ધૈર્નાનાવિધૈર્દિવ્યૈશ્ચન્દનૈઃ પુષ્પકૈરિહ ॥ ૪૩॥

વિતસ્તિમાત્રા દૂર્વા ચ ત્ર્યઙ્ગા વૈ મૂલવર્જિતા ।
ઈદૃશાનાં શાદ્વલાનાં શતેનૈકોત્તરેણ હ ॥ ૪૪॥

એકવિંશતિકેનૈવ પૂજયેત્પ્રતિમાં સ્થિતામ્ ।
ધૂપૈર્દીપૈશ્ચ નૈવેદ્યૈર્વિવિધૈર્ગણનાયકમ્ ॥ ૪૫॥

તામ્બૂલાદ્યર્ઘસદ્દ્રવ્યૈઃ પ્રણિપત્ય સ્તવૈસ્તથા ।
ત્વાં તત્ર પૂજયિત્વેત્થં બાલચન્દ્રં ચ પૂજયેત્ ॥ ૪૬॥

પશ્ચાદ્વિપ્રાંશ્ચ સમ્પૂજ્ય ભોજયેન્મધુરૈર્મુદા ।
સ્વયં ચૈવ તતો ભુઞ્જ્યાન્મધુરં લવણં વિના ॥ ૪૭॥

વિસર્જયેત્તતઃ પશ્ચાન્નિયમં સર્વમાત્મનઃ ।
ગણેશસ્મરણં કુર્યાત્સમ્પૂર્ણં સ્યાદ્ વ્રતં શુભમ્ ॥ ૪૮॥

એવં વ્રતેન સમ્પૂર્ણે વર્ષે જાતે નરસ્તદા ।
ઉદ્યાપનવિધિં કુર્યાદ્વ્રતસમ્પૂર્ત્તિહેતવે ॥ ૪૯॥

દ્વાદશ બ્રાહ્મણાસ્તત્ર ભોજનીયા મદાજ્ઞયા ।
કુમ્ભમેકં ચ સંસ્થાપ્ય પૂજ્યા મૂર્તિસ્ત્વદીયિકા ॥ ૫૦॥

સ્થણ્ડિલેઽષ્ટદલં કૃત્વા તદા વેદવિધાનતઃ ।
હોમશ્ચૈવાત્ર કર્તવ્યો વિત્તશાઠ્યવિવર્જિતૈઃ ॥ ૫૧॥

સ્ત્રીદ્વયં ચ તથા ચાત્ર બટુકદ્વયમાદરાત્ ।
ભોજયેત્પૂજયિત્વા વૈ મૂર્ત્યગ્રે વિધિપૂર્વકમ્ ॥ ૫૨॥

નિશિ જાગરણં કાર્યં પુનઃ પ્રાતઃ પ્રપૂજયેત્ ।
વિસર્જનં તતશ્ચૈવ પુનરાગમનાય ચ ॥ ૫૩॥

બાલકાચ્ચાશિષો ગ્રાહ્યાઃસ્વસ્તિવાચનમેવ ચ ।
પુષ્પાઞ્જલિં પ્રદદ્યાચ્ચ વ્રતસમ્પૂર્ણહેતવે ॥ ૫૪॥

નમસ્કારાંસ્તતઃ કૃત્વા નાનાકાર્યં પ્રકલ્પયેત્ ।
એવં વ્રતં કૃતં યેન તસ્યેપ્સિતફલં ભવેત્ ॥ ૫૫॥

યો નિત્યં શ્રદ્ધયા સાર્દ્ધં પૂજાં ચૈવ સ્વશક્તિતઃ ।
કુર્યાત્તવ ગણેશાન સર્વકામફલાપ્તયે ॥ ૫૬॥

સિન્દૂરૈશ્ચન્દનૈશ્ચૈવ તણ્ડુલૈઃ કેતકૈસ્તથા ।
ઉપચારૈરનેકૈશ્ચ પૂજયેત્ત્વાં ગણેશ્વરમ્ ॥ ૫૭॥

એવં ત્વાં પૂજયેયુર્યે ભક્ત્યા નાનોપચારતઃ ।
તેષાં સિદ્ધિર્ભવેન્નિત્યં વિઘ્નનાશો ભવેદિહ ॥ ૫૮॥

સર્વૈર્વર્ણૈઃ પ્રકર્ત્તવ્યા સ્ત્રીભિશ્ચૈવ વિશેષતઃ ।
ઉદયાભિમુખૈશ્ચૈવ રાજભિશ્ચ વિશેષતઃ ॥ ૫૯॥

યં યં કામયતે યો વૈ તં તમાપ્નોતિ નિશ્ચિતમ્ ।
અતઃ કામયમાનેન તેન સેવ્યઃ સદા ભવાન્ ॥ ૬૦॥

બ્રહ્મોવાચ
શિવેનૈવં તદા પ્રોક્તં ગણેશાય મહાત્મને ।
તદાનીં દૈવતૈશ્ચૈવ સર્વૈશ્ચ ઋષિસત્તમૈઃ ॥ ૬૧॥

તથેત્યુક્ત્વા તુ તૈઃસર્વૈર્ગણૈઃ શમ્ભુપ્રિયૈર્મુને ।
પૂજિતો હિ ગણાધીશો વિધિના પરમેણ સઃ ॥ ૬૨॥

તતશ્ચૈવ ગણાઃ સર્વે પ્રણેમુસ્તે ગણેશ્વરમ્ ।
સમાનર્ચુર્વિશેષેણ નાનાવસ્તુભિરાદરાત્ ॥ ૬૩॥

ગિરિજાયાસ્સમુત્પન્નો યશ્ચ હર્ષો મુનીશ્વર ।
ચતુર્ભિર્વદનૈર્વૈ તમવર્ણ્યં ચ કથં બ્રુવે ॥ ૬૪॥

દેવદુન્દુભયો નેદુર્નનૃતુશ્ચાપ્સરોગણાઃ ।
જગુર્ગન્ધર્વમુખ્યાશ્ચ પુષ્પવર્ષં પપાત હ ॥ ૬૫॥

જગત્સ્વાસ્થ્યં તદા પ્રાપ ગણાધીશે પ્રતિષ્ઠિતે ।
મહોત્સવો મહાનાસીત્સર્વં દુઃખં ક્ષયં ગતમ્ ॥ ૬૬॥

શિવાશિવૌ ચ મોદેતાં વિશેષેણાતિ નારદ ।
આસીત્સુમઙ્ગલં ભૂરિ સર્વત્ર સુખદાયકમ્ ॥ ૬૭॥

તતો દેવગણાઃ સર્વે ઋષીણાં ચ ગણાસ્તથા ।
સમાગતાશ્ચ યે તત્ર જગ્મુસ્તે તુ શિવાજ્ઞયા ॥ ૬૮॥

પ્રશંસન્તઃ શિવાં તત્ર ગણેશં ચ પુનઃ પુનઃ ।
શિવં ચૈવ તથા સ્તુત્વા કીદૃશં યુદ્ધમેવ ચ ॥ ૬૯॥

યદા સા ગિરિજા દેવી કોપહીના બભૂવ હ ।
શિવોઽપિ ગિરિજાં તત્ર પૂર્વવત્સમ્પ્રપદ્ય તામ્ ॥ ૭૦॥

ચકાર વિવિધં સૌખ્યં લોકાનાં હિતકામ્યયા ।
સ્વાત્મારામોઽપિ પરમો ભક્તકાર્યોદ્યતઃ સદા ॥ ૭૧॥

વિષ્ણુશ્ચ શિવમાપૃચ્છ્ય બ્રહ્માહં તં તથૈવ હિ ।
આગચ્છાવ સ્વધામં ચ શિવૌ સંસેવ્ય ભક્તિતઃ ॥ ૭૨॥

નારદ ત્વં ચ ભગવન્સઙ્ગીય શિવયોર્યશઃ ।
આગમો ભવનં સ્વં ચ શિવૌ પૃષ્ટ્વા મુનીશ્વર ॥ ૭૩॥

એતત્તે સર્વમાખ્યાતં મયા વૈ શિવયોર્યશઃ ।
ભવત્પૃષ્ટેન વિઘ્નેશયશઃ સમ્મિશ્રમાદરાત્ ॥ ૭૪॥

ઇદં સુમઙ્ગલાખ્યાનં યઃ શ‍ૃણોતિ સુસંયતઃ ।
સર્વમઙ્ગલસંયુક્તઃ સ ભવેન્મઙ્ગલાલયઃ ॥ ૭૫॥

અપુત્રો લભતે પુત્રં નિર્ધનો લભતે ધનમ્ ।
ભાર્યાર્થી લભતે ભાર્યાં પ્રજાર્થી લભતે પ્રજામ્ ॥ ૭૬॥

આરોગ્યં લભતે રોગી સૌભાગ્યં દુર્ભગો લભેત્ ।
નષ્ટપુત્રં નષ્ટધનં પ્રોષિતા ચ પતિં લભેત્ ।
શોકાવિષ્ટઃ શોકહીનઃ સ ભવેન્નાત્ર સંશયઃ ॥ ૭૭॥

ઇદં ગાણેશમાખ્યાનં યસ્ય ગેહે ચ તિષ્ઠતિ
સદા મઙ્ગલસંયુક્તઃ સ ભવેન્નાત્ર સંશયઃ ॥ ૭૮॥

યાત્રાકાલે ચ પુણ્યાહે યઃ શ‍ૃણોતિ સમાહિતઃ ।
સર્વાભીષ્ટં સ લભતે શ્રીગણેશપ્રસાદતઃ ॥ ૭૯॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે ગણેશગણાધિપપદવીપ્રાપ્તિવર્ણનં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૨.૪.૧૮॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૧૯. એકોનવિંશોઽધ્યાયઃ । વિવાહોપક્રમે ગણેશસ્ય પ્રથમપૂજ્યત્વવર્ણનમ્ ।

નારદ ઉવાચ
ગણેશસ્ય શ્રુતા તાત સમ્યગ્જનિરનુત્તમા ।
ચરિત્રમપિ દિવ્યં વૈ સુપરાક્રમભૂષિતમ્ ॥ ૧॥

તતઃ કિમભવત્તાત તત્ત્વં વદ સુરેશ્વર ।
શિવાશિવયશસ્સ્ફીતં મહાનન્દપ્રદાયકમ્ ॥ ૨॥

બ્રહ્મોવાચ
સાધુ પૃષ્ટં મુનિશ્રેષ્ઠ ભવતા કરુણાત્મના ।
શ્રૂયતાં દત્તકર્ણં હિ વક્ષ્યેઽહં ઋષિસત્તમ ॥ ૩॥

શિવા શિવશ્ચ વિપ્રેન્દ્ર દ્વયોશ્ચ સુતયોઃ પરમ્ ।
દર્શં દર્શં ચ તલ્લીલાં મહત્પ્રેમ સમાવહત્ ॥ ૪॥

પિત્રોર્લાલયતોસ્તત્ર સુખં ચાતિ વ્યવર્દ્ધત ।
સદા પ્રીત્યા મુદા ચાતિખેલનં ચક્રતુઃ સુતૌ ॥ ૫॥

તાવેવ તનયૌ તત્ર માતાપિત્રોર્મુનીશ્વર ।
મહાભક્ત્યા યદા યુક્તૌ પરિચર્યાં પ્રચક્રતુઃ ॥ ૬॥

ષણ્મુખે ચ ગણેશે ચ પિત્રોસ્તદધિકં સદા ।
સ્નેહો વ્યવર્દ્ધત મહાન્ શુક્લપક્ષે યથા શશી ॥ ૭॥

કદાચિત્તૌ સ્થિતૌ તત્ર રહસિ પ્રેમસંયુતૌ ।
શિવા શિવશ્ચ દેવર્ષે સુવિચારપરાયણૌ ॥ ૮॥

શિવાશિવાવૂચતુઃ
વિવાહયોગ્યૌ સઞ્જાતૌ સુતાવિતિ ચ તાવુભૌ ॥

વિવાહશ્ચ કથં કાર્યઃ પુત્રયોરુભયોઃ શુભમ્ । ૯॥

ષણ્મુખશ્ચ પ્રિયતમો ગણેશશ્ચ તથૈવ ચ ।
ઇતિ ચિન્તાસમુદ્વિગ્નૌ લીલાનન્દૌ બભૂવતુઃ ॥ ૧૦॥

સ્વપિત્રોર્મતમાજ્ઞાય તૌ સુતાવપિ સંસ્પૃહૌ ।
તદિચ્છયા વિવાહાર્થં બભૂવતુરથો મુને ॥ ૧૧॥

અહં ચ પરિણેષ્યામિ હ્યહં ચૈવ પુનઃ પુનઃ ।
પરસ્પરં ચ નિત્યં વૈ વિવાદે તત્પરાવુભૌ ॥ ૧૨॥

શ્રુત્વા તદ્વચનં તૌ ચ દમ્પતી જગતાં પ્રભૂ ।
લૌકિકાચારમાશ્રિત્ય વિસ્મયં પરમં ગતૌ ॥ ૧૩॥

કિં કર્તવ્યં કથં કાર્યો વિવાહવિધિરેતયોઃ ।
ઇતિ નિશ્ચિત્ય તાભ્યાં વૈ યુક્તિશ્ચ રચિતાદ્ભુતા ॥ ૧૪॥

કદાચિત્સમયે સ્થિત્વા સમાહૂય સ્વપુત્રકૌ ।
કથયામાસતુસ્તત્ર પુત્રયોઃ પિતરૌ તદા ॥ ૧૫॥

અસ્માકં નિયમઃ પૂર્વં કૃતશ્ચ સુખદો હિ વામ્ ॥

શ્રૂયતાં સુસુતૌ પ્રીત્યા કથયાવો યથાર્થકમ્ । ૧૬॥

સમૌ દ્વાવપિ સત્પુત્રૌ વિશેષો નાત્ર લભ્યતે ।
તસ્માત્પણઃ કૃતઃ શન્દઃ પુત્રયોરુભયોરપિ ॥ ૧૭॥

યશ્ચૈવ પૃથિવીં સર્વાં ક્રાન્ત્વા પૂર્વમુપાવ્રજેત્ ।
તસ્યૈવ પ્રથમં કાર્યો વિવાહઃ શુભલક્ષણઃ ॥ ૧૮॥

બ્રહ્મોવાચ
તયોરેવં વચઃ શ્રુત્વા શરજન્મા મહાબલઃ ।
જગામ મન્દિરાત્તૂર્ણં પૃથિવીક્રમણાય વૈ ॥ ૧૯॥

ગણનાથશ્ચ તત્રૈવ સંસ્થિતો બુદ્ધિસત્તમઃ ।
સુબુદ્ધ્યા સંવિચાર્યેતિ ચિત્ત એવ પુનઃ પુનઃ ॥ ૨૦॥

કિં કર્તવ્યં ક્વ ગન્તવ્યં લઙ્ઘિતું નૈવ શક્યતે ।
ક્રોશમાત્રં ગતઃ સ્યાદ્વૈ ગમ્યતે ન મયા પુનઃ ॥ ૨૧॥

કિં પુનઃ પૃથિવીમેતાં ક્રાન્ત્વા ચોપાર્જિતં સુખમ્ ।
વિચાર્યેતિ ગણેશસ્તુ યચ્ચકાર શૃણુષ્વ તત્ ॥ ૨૨॥

સ્નાનં કૃત્વા યથાન્યાયં સમાગત્ય સ્વયં ગૃહમ્ ।
ઉવાચ પિતરં તત્ર માતરં પુનરેવ સઃ ॥ ૨૩॥

ગણેશ ઉવાચ
આસને સ્થાપિતે હ્યત્ર પૂજાર્થં ભવતોરિહ ।
ભવન્તૌ સંસ્થિતૌ તાતૌ પૂર્ય્યતાં મે મનોરથઃ ॥ ૨૪॥

બ્રહ્મોવાચ
ઇતિ શ્રુત્વા વચસ્તસ્ય પાર્વતીપરમેશ્વરૌ ।
અસ્થાતામાસને તત્ર તત્પૂજાગ્રહણાય વૈ ॥ ૨૫॥

તેનાથ પૂજિતૌ તૌ ચ પ્રક્રાન્તૌ ચ પુનઃ પુનઃ ।
એવં ચ કૃતવાન્ સપ્ત પ્રણામાંસ્તુ તથૈવ સઃ ॥ ૨૬॥

બધ્દ્વાઞ્જલિરથોવાચ ગણેશો બુધ્દિસાગરઃ ।
સ્તુત્વા બહુતિથસ્તાત પિતરૌ પ્રેમવિહ્વલૌ ॥ ૨૭॥

ગણેશ ઉવાચ
ભો માતર્ભો પિતસ્ત્વં ચ શ◌ૃણુ મે પરમં વચઃ ।
શીઘ્રં ચૈવાત્ર કર્તવ્યો વિવાહઃ શોભનો મમ ॥ ૨૮॥

બ્રહ્મોવાચ
ઇત્યેવં વચનં શ્રુત્વા ગણેશસ્ય મહાત્મનઃ ।
મહાબુધ્દિનિધિં તં તૌ પિતરાવૂચતુસ્તદા ॥ ૨૯॥

શિવાશિવાવૂચતુઃ
પ્રક્રામેત ભવાન્સમ્યક્ પૃથિવીં ચ સકાનનામ્ ।
કુમારો ગતવાંસ્તત્ર ત્વં ગચ્છ પુર આવ્રજ ॥ ૩૦॥

બ્રહ્મોવાચ
ઇત્યેવં વચનં શ્રુત્વા પિત્રોર્ગણપતિર્દ્રુતમ્ ।
ઉવાચ નિયતસ્તત્ર વચનં ક્રોધસંયુતઃ ॥ ૩૧॥

ગણેશ ઉવાચ
ભો માતર્ભો પિતર્ધર્મરૂપૌ પ્રાજ્ઞૌ યુવાં મતૌ ।
ધર્મતઃ શ્રૂયતાં સમ્યક્ વચનં મમ સત્તમૌ ॥ ૩૨॥

મયા તુ પૃથિવી ક્રાન્તા સપ્તવારં પુનઃ પુનઃ ।
એવં કથં બ્રુવાતે વૈ પુનશ્ચ પિતરાવિહ ॥ ૩૩॥

બ્રહ્મોવાચ
તદ્વચસ્તુ તદા શ્રુત્વા લૌકિકીં ગતિમાશ્રિતૌ ।

મહાલીલાકરૌ તત્ર પિતરાવૂચતુશ્ચ તમ્ ॥ ૩૪॥

પિતરાવૂચતુઃ
કદા ક્રાન્તા ત્વયા પુત્ર પૃથિવી સુમહત્તરા ।
સપ્તદ્વીપા સમુદ્રાન્તા મહદ્ભિર્ગહનૈર્યુતા ॥ ૩૫॥

બ્રહ્મોવાચ
તયોરેવં વચઃ શ્રુત્વા શિવાશઙ્કરયોર્મુને ।
મહાબુદ્ધિનિધિઃ પુત્રો ગણેશો વાક્યમબ્રવીત્ ॥ ૩૬॥

ગણેશ ઉવાચ
ભવતોઃ પૂજનં કૃત્વા શિવાશઙ્કરયોરહમ્ ।
સ્વબુદ્ધ્યા હિ સમુદ્રાન્તપૃથ્વીકૃતપરિક્રમઃ ॥ ૩૭॥

ઇત્યેવં વચનં વેદે શાસ્ત્રે વા ધર્મસઞ્ચયે ।
વર્ત્તતે કિં ચ તત્તથ્યં નહિ કિં તથ્યમેવ વા ॥ ૩૮॥

પિત્રોશ્ચ પૂજનં કૃત્વા પ્રક્રાન્તિં ચ કરોતિ યઃ ।
તસ્ય વૈ પૃથિવીજન્યં ફલં ભવતિ નિશ્ચિતમ્ ॥ ૩૯॥

અપહાય ગૃહે યો વૈ પિતરૌ તીર્થમાવ્રજેત્ ।
તસ્ય પાપં તથા પ્રોક્તં હનને ચ તયોર્યથા ॥ ૪૦॥

પુત્રસ્ય ચ મહત્તીર્થં પિત્રોશ્ચરણપઙ્કજમ્ ।
અન્યતીર્થં તુ દૂરે વૈ ગત્વા સમ્પ્રાપ્યતે પુનઃ ॥ ૪૧॥

ઇદં સન્નિહિતં તીર્થં સુલભં ધર્મસાધનમ્ ।
પુત્રસ્ય ચ સ્ત્રિયાશ્ચૈવ તીર્થં ગેહે સુશોભનમ્ ॥ ૪૨॥

ઇતિ શાસ્ત્રાણિ વેદાશ્ચ ભાષન્તે યન્નિરન્તરમ્ ।
ભવદ્ભ્યાં તત્પ્રકર્ત્તવ્યમસત્યં પુનરેવ ચ ॥ ૪૩॥

ભવદીયં ત્વિદં રૂપમસત્યં ચ ભવેદિહ ।
તદા વેદોઽપ્યસત્યો વૈ ભવેદિતિ ન સંશયઃ ॥ ૪૪॥

શીઘ્રં ચ ભવિતવ્યો મે વિવાહઃ ક્રિયતાં શુભઃ ।
અથ વા વેદશાસ્ત્રં ચ વ્યલીકં કથ્યતામિતિ ॥ ૪૫॥

દ્વયોઃ શ્રેષ્ઠતમં મધ્યે યત્સ્યાત્સમ્યગ્વિચાર્ય તત્ ।
કર્તવ્યં ચ પ્રયત્નેન પિતરૌ ધર્મરૂપિણૌ ॥ ૪૬॥

બ્રહ્મોવાચ
ઇત્યુક્ત્વા પાર્વતીપુત્રઃ સ ગણેશઃ પ્રકૃષ્ટધીઃ ।
વિરરામ મહાજ્ઞાની તદા બુદ્ધિમતાં વરઃ ॥ ૪૭॥

તૌ દમ્પતી ચ વિશ્વેશૌ પાર્વતીશઙ્કરૌ તદા ।
ઇતિ શ્રુત્વા વચસ્તસ્ય વિસ્મયં પરમં ગતૌ ॥ ૪૮॥

તતઃ શિવા શિવશ્ચૈવ પુત્રં બુદ્ધિવિચક્ષણમ્ ।
સમ્પ્રશસ્યોચતુઃ પ્રીત્યા તૌ યથાર્થપ્રભાષિણમ્ ॥ ૪૯॥

શિવાશિવાવૂચતુઃ
પુત્ર તે વિમલા બુદ્ધિઃ સમુત્પન્ના મહાત્મનઃ ॥

ત્વયોક્તં યદ્વચશ્ચૈવ તતશ્ચૈવ ચ નાન્યથા ॥ ૫૦॥

સમુત્પન્ને ચ દુઃખે ચ યસ્ય બુદ્ધિર્વિશિષ્યતે ।
તસ્ય દુખં વિનશ્યેત સૂર્યે દૃષ્ટે યથા તમઃ ॥ ૫૧॥

બુદ્ધિર્યસ્ય બલં તસ્ય નિર્બુદ્ધેસ્તુ કુતો બલમ્ ।
કૂપે સિંહો મદોન્મત્તઃ શશકેન નિપાતિતઃ ॥ ૫૨॥

વેદશાસ્ત્રપુરાણેષુ બાલકસ્ય યથોદિતમ્ ।
ત્વયા કૃતં તુ તત્સર્વં ધર્મસ્ય પરિપાલનમ્ ॥ ૫૩॥

સમ્યક્કૃતં ત્વયા યચ્ચ તત્કેનાપિ ભવેદિહ ।
આવાભ્યાં માનિતં તચ્ચ નાન્યથા ક્રિયતેઽધુના ॥ ૫૪॥

બ્રહ્મોવાચ
ઇત્યુક્ત્વા તૌ સમાશ્વાસ્ય ગણેશં બુદ્ધિસાગરમ્ ।
વિવાહકરણે ચાસ્ય મતિં ચક્રતુરુત્તમામ્ ॥ ૫૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે ગણેશવિવાહોપક્રમો નામૈકોનવિંશોઽધ્યાયઃ ॥ ૨.૪.૧૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડે

## ૨.૪.૨૦. વિંશોઽધ્યાયઃ । ગણેશવિવાહવર્ણનમ્ ।

બ્રહ્મોવાચ

એતસ્મિન્નન્તરે તત્ર વિશ્વરૂપઃ પ્રજાપતિઃ ।
તદુદ્યોગં સંવિચાર્ય સુખમાપ પ્રસન્નધીઃ ॥ ૧॥

વિશ્વરૂપપ્રજેશસ્ય દિવ્યરૂપે સુતે ઉભે ।
સિદ્ધિબુદ્ધિરિતિ ખ્યાતે શુભે સર્વાઙ્ગશોભને ॥ ૨॥

તાભ્યાં ચૈવ ગણેશસ્ય ગિરિજા શઙ્કરઃ પ્રભૂ ।
મહોત્સવં વિવાહં ચ કારયામાસતુર્મુદા ॥ ૩॥

સન્તુષ્ટા દેવતાઃ સર્વાસ્તદ્વિવાહે સમાગમન્ ।
યથા ચૈવ શિવસ્યૈવ ગિરિજાયા મનોરથઃ ॥ ૪॥

તથા ચ વિશ્વકર્માઽસૌ વિવાહં કૃતવાંસ્તથા ।
તથા ચ ઋષયો દેવા લેભિરે પરમાં મુદમ્ ॥ ૫॥

ગણેશોઽપિ તદા તાભ્યાં સુખં પરમદુર્લભમ્ ।
પ્રાપ્તવાંશ્ચ મુને તત્તુ વર્ણિતું નૈવ શક્યતે ॥ ૬॥

કિયતા ચૈવ કાલેન ગણેશસ્ય મહાત્મનઃ ।
દ્વયોઃ પત્ન્યોશ્ચ દ્વૌ દિવ્યૌ તસ્ય પુત્રૌ બભૂવતુઃ ॥ ૭॥

સિદ્ધેર્ગણેશપત્ન્યાસ્તુ ક્ષેમનામા સુતોઽભવત્ ।
બુદ્ધેર્લાભાભિધઃ પુત્રો હ્યાસીત્પરમશોભનઃ ॥ ૮॥

એવં સુખમચિન્ત્યં વૈ ભુઞ્જાને હિ ગણેશ્વરે ।
આજગામ દ્વિતીયશ્ચ ક્રાન્ત્વા પૃથ્વીં સુતસ્તદા ॥ ૯॥

તાવચ્ચ નારદેનૈવ પ્રાપ્તો ગેહે મહાત્મના ।
યથાર્થં વચ્મિ નોઽસત્યં ન છલેન ન મત્સરાત્ ॥ ૧૦॥

પિતૃભ્યાં તુ કૃતં યચ્ચ શિવયા શઙ્કરેણ તે ।
તન્ન કુર્યાત્પરો લોકે સત્યં સત્યં બ્રવીમ્યહમ્ ॥ ૧૧॥

નિષ્કાસ્ય ત્વાં કુક્રમણં મિષમુત્પાદ્ય યત્નતઃ ।
ગણેશસ્ય વરોઽકારિ વિવાહઃ પરશોભનઃ ॥ ૧૨॥

ગણેશસ્ય કૃતોદ્વાહો લબ્ધવાંસ્ત્રીદ્વયં મુદા ।
વિશ્વરૂપપ્રજેશસ્ય કન્યારત્નં મહોત્તમમ્ ॥ ૧૩॥

પુત્રદ્વયં લલાભાસૌ દ્વયોઃ પત્ન્યોઃ શુભાઙ્ગયોઃ ।
સિદ્ધેઃ ક્ષેમં તથા બુદ્ધેર્લાભં સર્વસુખપ્રદમ્ ॥ ૧૪॥

પત્ન્યોર્દ્વયોર્ગણેશોઽસૌ લબ્ધ્વાપુત્રદ્વયં શુભમ્ ।
માતાપિત્રોર્મતેનૈવ સુખં ભુઙ્ક્તે નિરન્તરમ્ ॥ ૧૫॥

ભવતા પૃથિવી ક્રાન્તા સસમુદ્રા સકાનના ।
તચ્છલાજ્ઞાવશાત્તાત તસ્ય જાતં ફલં ત્વિદમ્ ॥ ૧૬॥

પિતૃભ્યાં હિ કૃતં યત્તુ છલં તાત વિચાર્યતામ્ ।
સ્વસ્વામિભ્યાં વિશેષેણ હ્યન્યઃ કિન્ન કરોતિ વૈ ॥ ૧૭॥

અસમ્યક્ચ કૃતં તાભ્યાં ત્વત્પિતૃભ્યાં હિ કર્મ હ ।
વિચાર્યતાં ત્વયાઽપીહ મચ્ચિત્તે ન શુભં મતમ્ ॥ ૧૮॥

દદ્યાદ્યદિ ગરં માતા વિક્રીણીયાત્પિતા યદિ ।
રાજા હરતિ સર્વસ્વં કસ્મૈ કિં ચ બ્રવીતુ વૈ ॥ ૧૯॥

યેનૈવેદં કૃતં સ્યાદ્વૈ કર્માનર્થકરં પરમ્ ।
શાન્તિકામસ્સુધીસ્તાત તન્મુખં ન વિલોકયેત્ ॥ ૨૦॥

ઇતિ નીતિઃ શ્રુતૌ પ્રોક્તા સ્મૃતૌ શાસ્ત્રેષુ સર્વતઃ ।
નિવેદિતા ચ સા તેઽદ્ય યથેચ્છસિ તથા કુરુ ॥ ૨૧॥

બ્રહ્મોવાચ
ઇત્યુક્ત્વા નારદ ત્વં તુ મહેશ્વરમનોગતિઃ ।
તસ્મૈ તથા કુમારાય વાક્યં મૌનમુપાગતઃ ॥ ૨૨॥

સ્કન્દોઽપિ પિતરં નત્વા કોપાગ્નિજ્વલિતસ્તદા ।
જગામ પર્વતં ક્રૌઞ્ચં પિતૃભ્યાં વારિતોઽપિ સન્ ॥ ૨૩॥

વારણે ચ કૃતે ત્વદ્ય ગમ્યતે ચ કથં ત્વયા ।
ઇત્યેવં ચ નિષિદ્ધોઽપિ પ્રોચ્ય નેતિ જગામ સઃ ॥ ૨૪॥

ન સ્થાતવ્યં મયા તાતૌ ક્ષણમપ્યત્ર કિઞ્ચન ।
યદ્યેવં કપટં પ્રીતિમપહાય કૃતં મયિ ॥ ૨૫॥

એવમુક્ત્વા ગતસ્તત્ર મુને સોઽદ્યાપિ વર્તતે ।
દર્શનેનૈવ સર્વેષાં લોકાનાં પાપહારકઃ ॥ ૨૬॥

તદ્દિનં હિ સમારભ્ય કાર્તિકેયસ્ય તસ્ય વૈ ।
શિવપુત્રસ્ય દેવર્ષે કુમારત્વં પ્રતિષ્ઠિતમ્ ॥ ૨૭॥

તન્નામ શુભદં લોકે પ્રસિદ્ધં ભુવનત્રયે ।
સર્વપાપહરં પુણ્યં બ્રહ્મચર્યપ્રદં પરમ્ ॥ ૨૮॥

કાર્તિક્યાં ચ સદા દેવા ઋષયશ્ચ સતીર્થકાઃ ।
દર્શનાર્થં કુમારસ્ય ગચ્છન્તિ ચ મુનીશ્વરાઃ ॥ ૨૯॥

કાર્તિક્યાં કૃત્તિકાસઙ્ગે કુર્યાદ્યઃ સ્વામિદર્શનમ્ ।
તસ્ય પાપં દહેત્સર્વં ચિત્તેપ્સિતફલં લભેત્ ॥ ૩૦॥

ઉમાઽપિ દુઃખમાપન્ના સ્કન્દસ્ય વિરહે સતિ ।
ઉવાચ સ્વામિનં દીના તત્ર ગચ્છ મયા પ્રભો ॥ ૩૧॥

તત્સુખાર્થં સ્વયં શમ્ભુર્ગતઃ સ્વાંશેન પર્વતે ।
મલ્લિકાર્જુનનામાસીજ્જ્યોતિર્લિઙ્ગં સુખાવહમ્ ॥ ૩૨॥

અદ્યાપિ દૃશ્યતે તત્ર શિવયા સહિતશ્શિવઃ ।
સર્વેષાં નિજભક્તાનાં કામપૂરઃ સતાં ગતિઃ ॥ ૩૩॥

તમાગતં સ વિજ્ઞાય કુમારઃ સશિવાં શિવમ્ ।
સ વિરજ્ય તતોઽન્યત્ર ગન્તુમાસીત્સમુત્સુકઃ ॥ ૩૪॥

દેવૈશ્ચ મુનિભિશ્ચૈવ પ્રાર્થિતઃ સોઽપિ દૂરતઃ ।
યોજનત્રયમુત્સૃજ્ય સ્થિતઃ સ્થાને ચ કાર્તિકઃ ॥ ૩૫॥

પુત્રસ્નેહાતુરૌ તૌ વૈ શિવૌ પર્વણિ પર્વણિ ।
દર્શનાર્થં કુમારસ્ય તસ્ય નારદ ગચ્છતઃ ॥ ૩૬॥

અમાવાસ્યાદિને શમ્ભુઃ સ્વયં ગચ્છતિ તત્ર હ ।
પૂર્ણમાસીદિને તત્ર પાર્વતી ગચ્છતિ ધ્રુવમ્ ॥ ૩૭॥

યદ્યત્તસ્ય ચ વૃત્તાન્તં ભવત્પૃષ્ટં મુનીશ્વર ।
કાર્તિકસ્ય ગણેશસ્ય પરમં કથિતં મયા ॥ ૩૮॥

એતચ્છ્રુત્વા નરો ધીમાન્ સર્વપાપૈઃ પ્રમુચ્યતે ।
શોભનાં લભતે કામાનીપ્સિતાન્સકલાન્સદા ॥ ૩૯॥

યઃ પઠેત્પાઠયેદ્વાપિ શ‍ૃણુયાચ્છ્રાવયેત્તથા ।
સર્વાન્કામાનવાપ્નોતિ નાત્ર કાર્યા વિચારણા ॥ ૪૦॥

બ્રાહ્મણો બ્રહ્મવર્ચસ્વી ક્ષત્રિયો વિજયી ભવેત્ ।
વૈશ્યો ધનસમૃદ્ધસ્સ્યાચ્છૂદ્રસ્સત્તમતામિયાત્ ॥ ૪૧॥

રોગી રોગાત્પ્રમુચ્યેત ભયાન્મુચ્યેત ભીતિયુક્ ।
ભૂતપ્રેતાદિબાધાભ્યઃ પીડિતો ન ભવેન્નરઃ ॥ ૪૨॥

એતદાખ્યાનમનઘં યશસ્યં સુખવર્દ્ધનમ્ ।
આયુષ્યં સ્વર્ગ્યમતુલં પુત્રપૌત્રાદિકારકમ્ ॥ ૪૩॥

અપવર્ગપ્રદં ચાપિ શિવજ્ઞાનપ્રદં પરમ્ ।
શિવાશિવપ્રીતિકરં શિવભક્તિવિવર્દ્ધનમ્ ॥ ૪૪॥

શ્રવણીયં સદા ભક્તૈર્નિષ્કામૈશ્ચ મુમુક્ષુભિઃ ।
શિવાદ્વૈતપ્રદં ચૈતત્સદાશિવમયં શિવમ્ ॥ ૪૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે ગણેશવિવાહવર્ણનં નામ વિંશોઽધ્યાયઃ ॥ ૨.૪.૨૦॥

॥ ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયરુદ્રસંહિતાયાં ચતુર્થઃ કુમારખણ્ડઃ સમાપ્તઃ ॥ ૨.૪॥

Proofread by H Revathy Rajaraman/Uma Mahesh

*Shri Shiva Mahapuranam 24 Rudra Samhita Kumarakhandah*

pdf was typeset on January 25, 2026

Please send corrections to *sanskrit@cheerful.com*